अर्थशास्त्रम्

नवमकक्ष्यायै पाठ्यपुस्तकम्



अर्थशास्त्र

नवमकक्षायाः कृते पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। पुस्तकीय-ज्ञानस्य अयं सिद्धान्तः तस्मात् न्यासाद् विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधि विद्यालयस्य गृहस्य च मध्ये अन्तरालं जन्यमाना अस्ति। नूतन-राष्ट्रिय-पाठ्यचर्याधारिताः पाठ्यक्रमाः पाठ्यपुस्तकानि च एतस्य आधारभूत-विचारस्य क्रियान्वयं कर्तुं कश्चन प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयस्य एकदृढभित्त्या आवरणस्य अथ च सूचना-संस्मारणस्य प्रवृत्तेः विरोधः समाविष्टः अस्ति। राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितां बालकेन्द्रित-व्यवस्थाम् अग्रे संवर्धयितुम् एते प्रयासाः अस्माकं कृते बहुलाभप्रदाः भविष्यन्ति इति आशासे।

अधुना एतस्य प्रयत्नस्य साफल्यम् एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयीयाः आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशील-गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणाधिगमसमये स्वीयैः अनुभवैः चिन्तनं कर्तुं कियतः अवसरान् प्रददति। अस्माभिः एतत् मन्तव्यं यत् यदि बालकेभ्यः समयं स्थानं स्वतन्त्रतां च प्रयच्छामः तर्हि ते ज्येष्ठैः समर्पितया सूचनया एवञ्च सामग्र्या सह युक्त्वा सङ्घर्षं च कृत्वा नूतन-ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुख-कारणं पाठ्यपुस्तकस्य परीक्षायाः एकमात्रम् आधारत्वेन निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् वयं बालकान् शिक्षणस्य प्रक्रियायां पूर्ण-सहभागित्वेन अङ्गीकुर्याम तथा च तेषां सहभागितां सुनिश्चिनवाम, ते बालकाः कक्षास्तरानुसारं ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति चिन्तनं त्यक्तव्यम्।

एते उद्देश्याः विद्यालयस्य दैनिक-जीवने कार्यशैल्यां च आधिक्येन परिवर्तनं याचन्ते। दैनन्दिन्यां समय-सारण्यां परिवर्तनशीलत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिक-कालन्धरस्य क्रियान्वयने जागरूकता, येन शिक्षणार्थं नियत-दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षण-मूल्याङ्कनयोः विधयः अपि एनं विषयं निश्चेष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनेभ्यः मानसिकोद्वेगस्य खिन्नतायाः च स्थाने हर्षं प्रदातुं कियत् प्रभावि सिध्यति। भारस्य समस्यायाः निदानार्थं पाठ्यक्रम-निर्मातृभिः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारण-समये बालानां मनोविज्ञानाय एवञ्च अध्यापनाय उपलब्ध-समयस्य अवधानं दातुं पूर्वापेक्षया अधिकः सचेष्टः प्रयत्नः कृतः अस्ति। एषः प्रयासः इतोऽपि गभीरतया स्यात् इति प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनाय, विस्मयाय, लघुसमूहेषु वार्तालापाय, तर्काय एवञ्च चर्चायै तथा च हस्ताभ्यां क्रियमाणेभ्यः गतिविधिभ्यः प्राथमिकतां प्रयच्छति।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायै निर्मितायाः पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञताम् आविष्करोति। परिषद् सामाजिक-विज्ञान-पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षं आचार्यहरि-वासुदेवन्-महोदयं प्रति तथा च एतस्याः पाठ्यपुस्तक-समितेः मुख्य-परामर्शदातारं प्रो. तापसमजूमदारं प्रति विशेषरूपेण आभारं प्रकटयति। एतस्य पाठ्यपुस्तकस्य वर्धने बहुभिः शिक्षकैः योगदानं कृतम्। एतद् योगदानं सफलीकर्तुं वयं तेषां शिक्षकाणां प्राचार्यान् प्रति अपि कृतज्ञतां प्रकटयामः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः यैः स्वीय-सामग्रीणाम्, संसाधनानाम् एवञ्च सहयोगिनां साहाय्यस्य स्वीकरणे औदार्यपूर्वकं सहयोगः कृतः।

वयं माध्यमिकोच्चशिक्षा-विभाग-मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य आचार्यमृणालमीरी-महोदयस्य एवञ्च आचार्यस्य जी.पी.देशपाण्डे-महोदयस्य आध्यक्ष्ये निर्मितायाः निरीक्षण-समितेः तान् सदस्यान् प्रति धन्यवादवचांसि व्यवहरामः ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः । व्यवस्थागत-संस्करणेषु स्वीय-प्रकाशनेषु च नैरन्तर्येण परिष्काराय समर्पिता परिषद् टिप्पणीः परामर्शान् च स्वागतीकरिष्यति येन भाविसंशोधनेषु साहाय्यं स्वीकर्तुं शक्येत ।

निदेशकः

राष्ट्रियशैक्षिकानुसन्धान

प्रशिक्षणपरिषद्

नवदेहली

२० दिसम्बर् २००५

पाठ्यपुस्तकनिर्माणसमितिः

अध्यक्षः, सामाजिक-विज्ञान-पाठ्यपुस्तकपरामर्शदातृसमितिः

हरिवासुदेवन्, *प्राध्यापकः*, इतिहासविभागः कलकत्ताविश्वविद्यालयः कलकत्ता

मुख्यपरामर्शदात्री

तापसमजूमदारः *सम्मानितप्राध्यापिका* (अर्थशास्त्रम्) जवाहरलालनेहरूविश्वविद्यालयः नवदेहली

समितिः

गुलशनसचदेवा, *वरिष्ठप्राध्यापकः* अन्ताराष्ट्रिय-अध्ययनकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः नवदेहली।

नूतनपुञ्जः, *पी.जी.टी.* (अर्थशास्त्रम्), केन्द्रीयविद्यालयः सीमासुरक्षाबलम् नज़फगढम् नवदेहली।

सुकन्याबोसः *वरिष्ठा अर्थशास्त्रवेत्री*, अर्थशास्त्रशोधफाउण्डेशन्, १२४ ए/१ कटवारियासरायः नवदेहली।

सदस्य-समन्वयिका

जयासिंहः, *सहायकप्राध्यापिका* सामाजिकविज्ञान-शिक्षाविभागः राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् नवदेहली।

कृतज्ञता-ज्ञापनम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् तान् सर्वान् लेखकान् प्रति कृतज्ञतां प्रकटयति यैः पुस्तकस्य लेखनकार्यं कृतम् अस्ति । जनमेजयखुन्तिया *वरिष्ठप्रवक्ता* स्कूल ऑफ कॉरेस्पोण्डैंस कोर्सेज़ दिल्लीविश्वविद्यालयः देहली, अरविन्दः सरदाना, एकलव्यं ,साकेतनगरम्, देवासः, मध्यप्रदेशः अथ च नीरजाशर्मा प्रवाचिका एवञ्च एम.वी. श्रीनिवासनः प्रवक्ता सामाजिकविज्ञानमानविकीशिक्षाविभागः राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् इति एतेषां सहायतया पुस्तकम् अन्तिमरूपं गतम् अतः एतान् प्रति वयं कृतज्ञतां प्रकटयामः ।

नवभारतटाइम्स् इत्यस्य सम्पादकाय सुन्दरचन्द्रठाकुराय वयं धन्यवादं प्रयच्छामः येन अस्य पुस्तकस्य हिन्द्यनुवादस्य कार्यं कृतम् । प्रेमदासः (लब्धावकाशः), वैज्ञानिकप्राविधिकशब्दावल्यायोगः, ओ.पी. अग्रवालः प्राध्यापकः (लब्धावकाशः) मेरठविश्वविद्यालयः उत्तरप्रदेशः, ए. एस. गर्गः *उपप्रधानाचार्यः*, राजकीयप्रतिभाविकासविद्यालयः गान्धिनगरम् - देहली, डी. एस.मिश्रा *टी.जी.टी.* (सामाजिकविज्ञानम्) राजकीयवरिष्ठमाध्यमिकबालविद्यालयः, बेगमपुरम् - देहली इति एतैः अनुवादस्य पुनरीक्षणनिमित्तम् आयोजितासु कार्यशालासु प्रतिभागं कृत्वा स्वीयं बहुमूल्यं योगदानं कृतम् अतः एतान् सर्वान् प्रति अपि वयं कृतज्ञाः स्मः ।

सविता सिन्हा (प्राध्यापिका अध्यक्षा च सामाजिकविज्ञानमानविकीशिक्षाविभागः) अस्य पुस्तकस्य विकासे यथाशक्यं सहयोगं कृतवती अतः तां प्रति विशेषरूपेण कृतज्ञताम् अभिव्यक्तीकुर्मः ।

पुस्तकस्य विकासस्य विभिन्नचरणेषु सहयोगार्थं *डी.टी.पी. इत्यस्य संचालकं दिपेन्द्रकुमारं, लेखसंशोधकं विभोरसिंहं,* कॉपीसम्पादकं विनयशङ्करपाण्डेयम् एवञ्च सुप्रियागुप्तां *सङ्गणककेन्द्रप्रभारिणं* दिनेशकुमारं प्रति अपि आभारिणः स्मः । प्रकाशनविभागद्वारा अस्मभ्यं पूर्णसहयोगः प्रदत्तः अपि च सौविध्यानि सुलभायितानि तदर्थं वयं तं प्रति कृतज्ञतां प्रकटयामः ।

विषय-सामग्री

आमुखम् iii

प्रथमः अध्यायः

पालमपुरग्रामस्य कथा 1

द्वितीयः अध्यायः

संसाधनरूपेण जनाः 16

तृतीयः अध्यायः

निर्धनता – एकम् आह्वानम् 29

चतुर्थः अध्यायः

भारते खाद्यसुरक्षा 41

अनुवादकः - हरिदत्तशर्मा

भारतीय-संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकम्[1] **[सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यम्]** निर्मातुं तथा च तस्य समस्तनागरिकानां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं **न्यायम्**,

विचारस्य अभिव्यक्तेः विश्वासस्य धर्मस्य

उपासनायाः च **स्वतन्त्रताम्**,

प्रतिष्ठायायाः अवसरस्य च **समतां**

प्रापयितुं

तथा च तेषु **सर्वेषु**

मानवीयगौरवस्य तथा च[2] **[राष्ट्रियैकतायाः अखण्डतायाश्च]** सुनिश्चयकर्त्रीं **बन्धुतां** संवर्धयितुं

दृढसङ्कल्पितो भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य 1949 तमस्य ख्रिस्ताब्दस्य नवम्बरमासस्य 26 तमे दिनाङ्के (2006 तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लसप्तम्याम्) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

---

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977तः) " प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।
2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977तः) " राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम् ।

पालमपुरग्रामस्य कथा

अवलोकनम्

उत्पादन-सम्बद्धैः कैश्चित् मूलविचारैः सह परिचयः भवतु इति अस्याः कथायाः उद्देश्यम् अस्ति । एतदुद्देश्य-पूर्तिं वयं पालमपुरनामकस्य काल्पनिक-ग्रामस्य कथायाः माध्यमेन करिष्यामः ।

पालमपुरे कृषिः मुख्यक्रिया अस्ति। लघुस्तरीय-विनिर्माणम्, दुग्धोत्पादनम्, परिवहनम् इत्यादयः अन्याः क्रियाः सीमितस्तरे क्रियन्ते। एतासाम् उत्पादन-क्रियाणां कृते प्राकृतिक-संसाधनम्, मानवैः निर्मित-संसाधनम्, मानव-प्रयासः एवञ्च मुद्रा इत्यादीनि विविधानि संसाधनानि आवश्यकानि भवन्ति । पालमपुरस्य कथायाः माध्यमेन वयं ज्ञास्यामः यत् ग्रामेषु इष्टवस्तूनि सेवाः च उत्पादयितुं विभिन्नानि संसाधनानि केन प्रकारेण समायोजितानि भवन्ति ।

परिचयः

पालमपुरं प्रतिवेशि-ग्रामैः नगरैः च सह सम्यक्तया संयुक्तम् अस्ति। रायगञ्जम् इति नामकः कश्चन विशालः ग्रामः पालमपुरात् त्रिकिलोमीटरमिते दूरे अस्ति । प्रत्येकस्मिन् ऋतौ अयं मार्गः ग्रामं रायगञ्जेन एवञ्च ततः अग्रवर्तिना निकटतमेन लघुग्रामेण सह संयोजयति। अस्मिन् मार्गे गुडेन अन्यैः च वस्तुभिः भरितानि बलिवर्द-शकटानि, महिषशकटानि मोटरचक्रिका, जीपयानम्, ट्रैक्टर् एवञ्च भारवाहकाणि इत्यादीनि वाहनानि द्रष्टुं शक्यन्ते। अस्मिन् ग्रामे विभिन्नजातीनां प्रायशः 450 कुटुम्बाः निवसन्ति। ग्रामे अधिकांशाः भूस्वामिनः उच्चजातेः अशीतिः कुटुम्बाः सन्ति । तेषां गृहेषु कानिचन गृहाणि बहुविशालानि सन्ति अपि च इष्टिकाश्मचूर्णैः निर्मितानि सन्ति। अनुसूचितजातेः (दलिताः) जनानां संख्या ग्रामस्य समग्रजनसंख्यायाः तृतीयांशः अस्ति । एते जनाः ग्रामस्य कस्मिंश्चित् लघुकोणे बहुलघुगृहेषु निवासं कुर्वन्ति। एतेषु गृहेषु कानिचन गृहाणि मृत्तिकया एवञ्च

चित्रम् 1.1 कस्यचिद् ग्रामस्य दृश्यम्

घासादिभिः निर्मितानि सन्ति। अधिकांश-जनानां गृहेषु विद्युत् अस्ति। कृषिक्षेत्रेषु सर्वे अपि नलकूपाः विद्युता एव प्रचलन्ति। अस्याः विद्युतः उपयोगः विविधकार्याणां कृते अपि क्रियते। पालमपुरे द्वौ प्राथमिक-विद्यालयौ एकश्च उच्चविद्यालयः अस्ति। ग्रामे एकं राजकीय-प्राथमिक-स्वास्थ्यकेन्द्रम् एकः च निजः औषधालयः अपि अस्ति यत्र रोगिणाम् उपचारः क्रियते।

उपर्युक्त-विवरणेन स्पष्टं भवति यत् पालमपुरे मार्गाणां परिवहन-साधनानां विद्युतः सेचनस्य विद्यालयानां स्वास्थ्यकेन्द्राणां च पर्याप्तम् एवञ्च विकसितं तन्त्रम् अस्ति । एतेषां सौविध्यानां तुलनां निजनिकटवर्तिनि ग्रामे उपलब्धैः सौविध्यैः सह कुर्वन्तु ।

पालमपुरम् इति काल्पनिक-ग्रामस्य कथा अस्मान् कस्यचित् अपि ग्रामस्य उत्पादन-सम्बद्ध-क्रियाविधीनां विषये बोधयिष्यति। भारतस्य ग्रामेषु कृषिः उत्पादनस्य प्रमुख-क्रियाविधिः अस्ति । **कृषिभिन्न-क्रिया** इति कथ्यमानासु अन्यासु उत्पादन-क्रियासु लघु-विनिर्माणम्, परिवहनम् एवञ्च आपण-वृत्तिः इत्यादि समाविष्टम् अस्ति। उत्पादनस्य विषये कांश्चन सामान्य-विषयान् ज्ञात्वा एतयोः उभयोः क्रियाविध्योः विषये विचारं करिष्यामः ।

उत्पादनस्य सङ्घटनम्

यानि वस्तूनि अस्माकं कृते आवश्यकानि भवन्ति तेषां वस्तूनां सेवानां च उत्पादनाय चत्वारि वस्तूनि आवश्यकानि सन्ति - सेवानां च उत्पादनम् एव उत्पादनस्य उद्देश्यम् अस्ति । वस्तूनां तत्र **भूमिः** तथा च जल-वन-खनिजसदृशानि अन्यानि

इदं कथ्यं आंशिकरूपेण गिल्बर्ट एटीनस्य शोधाध्ययने आधारितस्य पश्चिमोत्तरप्रदेशस्य बुलंदशहर इति जनपदस्य कस्मिंश्चित् ग्रामात् उद्धृतम् अस्ति ।

प्राकृतिक-संसाधनानि प्रथमावश्यकतायाः वस्तूनि सन्ति। **श्रमः** द्वितीया आवश्यकता अस्ति अर्थात् ये जनाः कार्यं करिष्यन्ति। कासुचित् उत्पादन-क्रियासु आवश्यककार्याणि कर्तुं बहुशिक्षिताः कर्मिणः अपेक्षिताः भवन्ति। अन्यासां कासाञ्चित् क्रियाणां कृते शारीरिक-कार्याणि कर्तुं योग्याः श्रमिकाः अपेक्षिताः भवन्ति। एकैकः श्रमिकः उत्पादनस्य कृते आवश्यकं श्रमं करोति।

भौतिक-परिसम्पत्तिः तृतीया आवश्यकता अस्ति अर्थात् उत्पादनस्य प्रत्येकस्मिन् स्तरे अपेक्षितानि बहुविधानि आगतानि। किं भवन्तः जानन्ति यत् भौतिक-परिसम्पत्तौ कानि कानि आगतानि अन्तर्भूतानि सन्ति ?

(क) उपकरणम्, यन्त्रम्, भवनम् – यन्त्रोपकरणान्तर्गतम् अत्यन्तसामान्योपकरणात् कृषक-हलाद् आरभ्य विद्युज्-जनित्रम्, वरीवर्तः संगणकं च इत्यादीनि परिष्कृत-यन्त्राणि अन्तर्भवन्ति। यन्त्रोपकरण-भवनानाम् उत्पादने बहूनि वर्षाणि यावत् प्रयोगः क्रियते। इमानि स्थायि-परिसम्पत्तिः इति कथ्यन्ते।

(ख) *असंशोधित-सामग्री रोकमुद्रा च* – उत्पादने बहुविधा असंशोधित-सामग्री आवश्यकी भवति यथा – तन्तुवायेन प्रयुज्यमानः तन्तुः कुम्भकारैः च प्रयुज्यमाना मृत्तिका। उत्पादनकाले निस्ताराय अथ च अपेक्षितसामग्रीं क्रेतुं किञ्चिद् धनम् अपि आवश्यकं भवति। असंशोधित-सामग्री रोकधनं च कार्यशील-परिसम्पत्तिः इति कथ्यते। यन्त्रोपकरण-भवनभिन्नानि इमानि वस्तूनि उत्पादन-**क्रियावधौ समाप्तिं** गच्छन्ति।

एका चतुर्थी आवश्यकता अपि भवति। स्वोपभोगनिमित्तम् अथवा विपणौ विक्रयनिमित्तम् उत्पादयितुं भूमिः श्रमः भौतिकपरिसम्पतिः च युगपत् कार्यं कर्तुं क्षमाः भवेयुः इति बुद्ध्या ज्ञानस्य उद्यमस्य च आवश्यकता भवति। एषु दिवसेषु एतत् मानव-परिसम्पत्तिः इति कथ्यते। **मानव-परिसम्पत्तेः** विषये इतोऽपि अधिकम् अध्ययनं वयम् अग्रिमे अध्याये करिष्यामः।

पालमपुरे 1960तः आरभ्य अद्यपर्यन्तं कर्षणान्तर्गतस्य भूमि-क्षेत्रस्य कोऽपि विस्तारः न अभवत्। तदा पर्यन्तं ग्रामस्य काचिद् ऊषर-भूमिः कृषियोग्यभूमिरूपेण परिवर्तिता आसीत्। नूतनां भूमिं कृषियोग्यां कृत्वा कृष्युत्पादनस्य इतः अपि अधिकवर्धनस्य

चित्रम् 1.2 शिल्पशालासु उपकरणेषु कार्याणि कुर्वन्तः श्रमिकाः

• चित्रे उत्पादने प्रयुक्तभूमेः श्रमस्य स्थायिसम्पत्यश्च परिचयं प्राप्नुवन्तु।

भूमिं श्रमं परिसम्पत्तिं च संयोज्य उत्पादनं संघटितं भवति। एते **उत्पादनस्य कारकाः** इति अपि कथ्यन्ते। पालमपुरस्य कथायाः पठन-क्रमे वयम् उत्पादनस्य प्रथमकारकत्रयस्य विषये इतोऽपि अधिकं ज्ञास्यामः। सौविध्यार्थम् अस्मिन् अध्याये अस्माभिः भौतिक-परिसम्पत्तिः परिसम्पत्तिः इति नाम्ना कथयिष्यते।

पालमपुरे कृषिः

1. भूमिः स्थिरा अस्ति

पालमपुरे कृषिः उत्पादनस्य प्रमुख-क्रिया अस्ति। कार्याणि कुर्वत्सु जनेषु 75प्रतिशतमिताः जनाः स्वजीविकायै कृषिम् आश्रयन्ति। ते कृषकाः कृषिश्रमिकाः वा भवितुं शक्नुवन्ति। एतेषां जनानां हितं क्षेत्रेषु उत्पादनेन सह संयुतम् अस्ति।

परञ्च स्मरणं भवेत् यत् कृष्युत्पादने एकं मूलभूतं

हेक्टेयर् इति भूमि-मापनस्य मानकम् ऐककम् अस्ति । यद्यपि ग्रामेषु भूमि-मापः बीघा गुण्ठा चेति कथ्यमानैः क्षेत्रीयैः ऐककैः अपि क्रियते । एकहेक्टेयर् इति मानं तेन क्षेत्रफलेन समं भवति यस्य भुजा 100मीटरवर्गमिता भवति । किं भवन्तः एकहेक्टेयरमितमानस्य क्षेत्रस्य तुलनां स्वविद्यालयस्य क्षेत्रेण सह कर्तुं शक्नुवन्ति ?

2. किं तस्याः भूमेः एव अधिकोत्पादनं कर्तुं कोऽपि विधिः अस्ति ?

पालमपुरे यादृशं सस्यम् उत्पाद्यते यादृशानि च सौविध्यानि उपलब्धानि सन्ति तद्-दृशा पालमपुरम् उत्तरप्रदेशस्य पश्चिम-ग्रामः इव प्रतिभाति । पालमपुरे समस्त-भूमौ कृषिः क्रियते । कापि भूमिः व्यर्थं न त्यज्यते । वर्षाऋतौ कृषकाः यवनालं प्रियङ्गुं च उत्पादयन्ति । एते पादपाः पशूनाम् आहाराय प्रयुज्यन्ते । एतदनन्तरम् अक्तूबर-दिसम्बरमध्ये आलु-कृषिः क्रियते । शीतऋतौ क्षेत्रेषु गोधूमः उत्पाद्यते । उत्पादित-गोधूमात् कुटुम्बस्य भोजनार्थं किञ्चित् संरक्ष्य शेषगोधूमं कृषकाः रायगञ्जस्य महाविपणौ विक्रीणन्ते । भूमेः एकस्मिन् भागे इक्षुदण्डस्य कृषिः अपि क्रियते । अस्य इक्षुसस्यस्य कर्तनं वर्षे एकवारं क्रियते । इक्षुदण्डः निजासंशोधितरूपेण अथवा गुडरूपेण शाहपुरस्य व्यापारिभ्यः विक्रीयते ।

पालमपुरे एकस्मिन् वर्षे कृषकाः त्रीणि पृथक् पृथक् सस्यानि एतदर्थम् उत्पादयन्ति यतो हि तत्र सेचनस्य सुविकसित-व्यवस्था अस्ति । पालमपुरे विद्युत् शीघ्रमेव आगता आसीत् । तस्याः मुख्यप्रभावः अयं जातः यत् सेचनस्य पद्धतिः एव परिवर्तिता । तदापर्यन्तं कृषकाः कूपेभ्यः रहटद्वारा जलं निष्कास्य लघुलघुक्षेत्राणां सेचनं कुर्वन्ति स्म । जनैः दृष्टं यत् विद्युता प्रचाल्यमानैः कूपैः अधिकप्रभाविरीत्या अधिकक्षेत्रस्य सेचनं कर्तुं शक्यते । प्रारम्भे केचन नलकूपाः शासनद्वारा स्थापिताः आसन् । परन्तु शीघ्रमेव कृषकाः स्वीयान् नलकूपान् स्थापयितुम् आरभन्त । परिणामतः 1970तमदशकस्य मध्ये 200हेक्टेयरमितस्य सम्पूर्णक्षेत्रस्य सेचनम् आरब्धम् ।

भारते सर्वेषु ग्रामेषु एतादृशस्य उच्चस्तरीय-सेचनस्य व्यवस्था नास्ति । नदी-क्षेत्राणि अतिरिच्य अस्माकं देशे तटीयक्षेत्रेषु सुष्ठु सेचनं क्रियते। एतद्-विपरीतं दक्षिणपठारसदृशेषु पठारिक्षेत्रेषु सेचनं न्यूनं भवति । देशे अद्यापि समस्तकृषि-क्षेत्रस्य प्रतिशतं चत्वारिंशत्तः अपि न्यूने क्षेत्रे एव सेचनं क्रियते । शेषक्षेत्रेषु कृषिः मुख्यतः वर्षाः आश्रयति ।

एकस्मिन् वर्षे कस्याञ्चिद् भूमौ एकाधिक-सस्यानाम् उत्पादनं **बहुविध-सस्य-प्रणाली** कथ्यते । इयं भूमेः कस्मिंश्चित् खण्डे उत्पादन-वर्धनस्य सामान्या प्रणाली अस्ति । पालमपुरे सर्वे कृषकाः न्यूनातिन्यूनं द्वे मुख्ये सस्ये उत्पादयन्ति । अनेके कृषकाः गतेभ्यः 15-20वर्षेभ्यः तृतीयसस्यरूपेण आलुम् उत्पादयन्तः सन्ति ।



चित्रम् 1.3 विभिन्न सस्यानि

आगच्छन्तु चर्चां कुर्याम -

- 1.1सारण्यां दशलक्षहेक्टेयरमितेषु ऐककेषु भारते कृषि-क्षेत्राणि दर्शितानि सन्ति । सारण्याः अधस्तात् प्रदत्ते आरेखे एतस्य चित्रणं कुर्वन्तु । आरेखः किं दर्शयति ? कक्षायां चर्चां कुर्वन्तु ।
- किं सेचनान्तर्गतस्य क्षेत्रस्य वर्धनम् आवश्यकम् अस्ति? किमर्थम्?

सारणी 1.1 गतवर्षेषु कर्षण-क्षेत्राणि

वर्षम्	कृषिक्षेत्रम् (मिलेनियम्-हेक्टेयर्-मानेन)

1950	120
1960	130
1970	140
1980	140
1990	140
2000	140
2004	140
2006	140
2008	140
2010-11	140



स्रोतः : आर्थिक-सर्वेक्षणम् 2013-14

- भवन्तः पालमपुरे उत्पाद्यमानानां सस्यानां विषये पठितवन्तः सन्ति । स्वक्षेत्रे उत्पाद्यमानानां सस्यानां सूचनाः आधारीकृत्य अधोदत्तां सारणीं पूरयन्तु -

कस्याश्चिद् भूमेः खण्डात् उत्पादन-वर्धनाय बहुविध-सस्यप्रणाली एकः विधिः अस्ति इति भवद्भिः दृष्टम् । अधिकोत्पादनार्थं क्षेत्रे आधुनिक-कृषिविधीनां प्रयोगः भवेत् इति द्वितीय-विधिः अस्ति । भूमेः कस्मिंश्चिद् खण्डे एकस्मिन्नेव ऋतौ उत्पादितानां सस्यानां रूपेण उत्पादनस्य मापः क्रियते । 1960तमदशकस्य मध्यावधिं यावत् कृषौ पारम्परिक-बीजानां प्रयोगः क्रियते स्म । तेषां बीजानाम् उत्पादनम् सापेक्षं न्यूनम् आसीत् । परम्परागत-बीजानां कृते न्यूनं सेचनम् आवश्यकं भवति स्म । कृषकाः उर्वरकाणां रूपेण गोमयस्य अथवा अन्यप्राकृतिकोर्वरकाणां प्रयोगं कुर्वन्ति स्म । एतत्सर्वं कृषकाणां पार्श्वे तत्कालमेव उपलब्धम् आसीत् । अर्थात् एतत् क्रेतुम् आवश्यकता न आसीत् ।

1960तमदशकान्ते **हरित-क्रान्तितः** भारतीय-कृषकाः अधिकोत्पादक-बीजानां द्वारा गोधूम-तण्डुलयोः कृषेः नूतन-विधीन् शिक्षितवन्तः । परम्परागत-बीजानाम् अपेक्षया



चित्रम् 1.4 कृषेः आधुनिक-विधयः- बहूत्पादन-प्रजाति-बीजानि रासायनिकोर्वरकादीनि च

सस्य-नाम	कस्मिन् मासे उप्तम्	कस्मिन् मासे कर्तितम्	सेचन-साधनम् (वर्षाः,सरोवरः,नलकूपम्,कुल्याः आदीनि)

अधिकोत्पादक-बीजैः एकस्माद् पादपाद् एव अधिकमात्रायाम् अन्नोत्पादनस्य आशा आसीत् । एतत्-परिणामतः भूमेः तस्मिन्नेव

खण्डे पूर्वापेक्षया अन्नस्य अधिकमात्रायाम् उत्पादनम् आरब्धम् ।

यद्यपि बहूत्पादन-प्रजाति-बीजैः अधिकतमम् उत्पादनं प्राप्तुं बह्वधिक-जलस्य रासायनिकोर्वरकाणां कीटनाशकानां च आवश्यकता आसीत् । अधिकम् उत्पादनं केवलं बहूत्पादन-प्रजातिबीजानां सेचनस्य रासायनिकोर्वरकाणां कीटनाशकानां च संयोजनेन एव सम्भवम् आसीत् ।

भारते पञ्जाब-हरियाणा-पश्चिमोत्तरप्रदेशानां कृषकाः कृषेः आधुनिक-विधीनां सर्वप्रथमं प्रयोगं कृतवन्तः । एषु क्षेत्रेषु कृषकाः कृषौ सेचनाय नलकूपानां बहूत्पादन-प्रजाति-बीजानां रासायनिकोर्वरकाणां कीटनाशकानां च प्रयोगं कृतवन्तः । तेषु केचन ट्रैक्टर-यन्त्राणि, सस्य-गाहनार्थं च यन्त्राणि क्रीतवन्तः । तेन कर्षण-कर्तन-कार्यं तीव्रम् अभवत् । एतैः यन्त्रैः कृषकाः गोधूमस्य अधिकम् उत्पादनं प्राप्तवन्तः ।

पालमपुरे परम्परागत-बीजप्रयोगेण गोधूमस्य उत्पादनं प्रतिहेक्टेयरं 1300किलोग्राममितम् आसीत् । बहूत्पादनप्रजाति-बीजप्रयोगेण उत्पादनं प्रतिहेक्टेयरं 3,200किलोग्राममितम् अभवत् । गोधूमस्य उत्पादने बह्वधिका वृद्धिः अभवत् । सम्प्रति कृषकाणां पार्श्वे आपणेषु विक्रेतुम् अधिशेष-गोधूमस्य पर्याप्त-मात्रा उपलब्धा आसीत् ।

आगच्छन्तु चर्चां कुर्याम -

- बहुविध-सस्यप्रणाल्याः कृषेः आधुनिक-विधीनां च मध्ये कः भेदः अस्ति ?
- सारण्यां 1.2 भारते हरित-क्रान्तेः अनन्तरं गोधूम-द्विदलानाम् उत्पादनं कोटिटनमितैः ऐककैः दर्शितम् अस्ति । एतत् एकम्

सारणी 1.2 : द्विदलानां गोधूमस्य च उत्पादनम् (मिलियम्-टन-मानेन)

	द्विदलस्य उत्पादनम्	गोधूमस्य उत्पादनम्
1965- 66	10	10
1970-71	12	24
1980-81	11	36
1990-91	14	55
2000-01	11	70
2010-11	18	86
2011-12	17	95
2012-13	18	94
2013-14	19	95

स्रोतः - कृषि-सहकारिता-विभागः, आर्थिक-साख्यिकीय-निदेशालयः, आर्थिक-सर्वेक्षणम् 2014-15, पॉकेट-बुक ऑन एग्रीकल्चरल-स्टैटिस्टिक्स्, 2014

आरेखं निर्माय दर्शयन्तु । किं हरित-क्रान्तिः उभयोः एव सस्ययोः कृते समानरूपेण सफला सिद्धा अभवत् ? विचार-विमर्शान् कुर्वन्तु ।

- आधुनिक-कृषिविधीनाम् अङ्गीकर्तृणां कृषकाणां कृते आवश्यकी कार्यशील-परिसम्पत्तिः का अस्ति ?
- पूर्वापेक्षया कृषेः आधुनिक-विधीनां कृते कृषकाः अधिकरोकधनस्य आवश्यकताम् अनुभवन्ति । किमर्थम् ?

परामृष्टाः क्रियाः -

क्षेत्रं प्राप्य स्वक्षेत्रस्य कैश्चित् कृषकैः सह वार्ताः कृत्वा एतत् ज्ञातुं प्रयासं कुर्वन्तु -

1. कृषेः आधुनिक-परम्परागत-मिश्रितविधिषु कृषकाः कस्य विधेः प्रयोगं कुर्वन्ति ? एकां टिप्पणीं लिखन्तु ।
2. सेचनस्य स्रोतांसि कानि सन्ति ?
3. कृषि-भूमेः कियति भागे सेचनं भवति ? (बहुन्यूने/ प्रायशः अर्धे/ अधिकांशे/ समस्ते)
4. कृषकाः स्वस्य कृते आवश्यकानि आगतानि कुतः प्राप्नुवन्ति ?

3. किं भूमिः एतत् धर्तुं शक्ष्यति ?

भूमिः एकं प्राकृतिकं संसाधनम् अस्ति । अतः अस्याः अवधानतापूर्वकं प्रयोगः करणीयः इति आवश्यकम् अस्ति । वैज्ञानिकाख्याभिः संकेतः प्राप्यते यत् कृषेः आधुनिक-कृषिविधिभिः प्राकृतिक-संसाधनाधारस्य अत्युपयोगः कृतः अस्ति । अनेकक्षेत्रेषु हरित-क्रान्तिकारणेन उर्वरकाणाम् अधिकप्रयोगात् मृत्तिकायाः उर्वरतायां न्यूनता आगता अस्ति । एतद्-विपरीतं नलकूप-सेचन-कारणात् भूमिजलस्य सतत-प्रयोगः अभवत् इति कारणात् भौमजल-स्तरः न्यूनः जातः अस्ति । मृत्तिकायाः उर्वरता अथ च भौमसदृश-पर्यावरणीय-संसाधनानि अनेकवर्षैः निर्माणं प्राप्नुवन्ति । एकवारं नाशं गच्छन्ति चेत् तेषां पुनर्जीवनं बहुकठिनम् अस्ति । कृषेः भाविविकासं सुनिश्चेतुम् अस्माभिः पर्यावरणस्य संरक्षणं करणीयम् इति ।

परामृष्टा क्रिया ---

- समाचारपत्रेषु पत्रिकासु वा पाठ-प्रदत्ताः आख्याः पठित्वा कथं रासायनिकोर्वरकाणां प्रयोगः हानिकारकः भवितुं शक्नोति इति कृषिमन्त्रिणं ज्ञापयन्तः स्वशब्दैः एकं पत्रं लिखन्तु ।



...रासायनिकोर्वरकाणि एतादृशानि खनिजानि प्रयच्छन्ति यानि जले विलयं प्राप्नुवन्ति ततश्च झटिति पादपैः उपलभ्यन्ते। परन्तु मृत्तिका दीर्घसमयं यावद् इमानि धारयितुं न शक्नोति। तानि मृत्तिकातः निर्गत्य भौमजलम्, नदीः तडागान् च प्रदूषयन्ति । रासायनिकोर्वरकाणि मृत्तिकोपस्थितान् जीवाणून् सूक्ष्मावयवान् च नाशयितुं शक्नुवन्ति । अस्य अयम् अर्थः यत् एतेषां प्रयोगस्य किञ्चित्-कालानन्तरं मृत्तिका पूर्वापेक्षया न्यूना उर्वरा स्थास्यति ...

(**स्रोतः** डाउन टू अर्थ, नवदेहली)

देशे रासायनिकोर्वरकस्य सर्वाधिकः प्रयोगः पञ्जाबे अस्ति। रासायनिकोर्वरकाणां निरन्तर-प्रयोगात् मृत्तिकायाः गुणवत्ता न्यूना अभवत् । पञ्जाबस्य कृषकैः प्राक्तनम् उत्पादन-स्तरं प्राप्तुम् अधुना अधिकाधिक-रासायनिकोर्वरकाणाम् अन्येषाम् आगतानां च प्रयोगः करणीयः भवति । अस्य अयम् अर्थः अस्ति यत् तत्र कृषेः मूल्यं निरन्तरं वर्धमानम् अस्ति।

(**स्रोतः** द ट्रिब्यून, चण्ढीगढम्)

4. पालमपुरस्य कृषकाणां मध्ये भूमेः वितरणं केन प्रकारेण अस्ति ?

भवन्तः एतत् ज्ञातवन्तः स्युः यत् कृषेः कृते भूमिः कियती महत्त्वपूर्णा अस्ति। दुर्भाग्यवशात् कृषिकर्मणि रतानां सर्वेषां जनानां पार्श्वे कृषेः कृते पर्याप्त-भूमिः नास्ति । पालमपुरे 450कुटुम्बेषु प्रायशः150 कुटुम्बानां पार्श्वे कृषेः कृते भूमिः नास्ति। एते अधिकांशतः दलिताः सन्ति।

शेषकुटुम्बेषु 240कुटुम्बानां पार्श्वे भूमिः अस्ति । एते लघुभूमिखण्डेषु येषां क्षेत्रफलं द्विहेक्टेयराद् न्यूनम् अस्ति तत्र कृषिं कुर्वन्ति। भूमेः एतादृशेषु खण्डेषु कृषि-करणात् कृषकाणां कुटुम्बाः पर्याप्तम् आयं न प्राप्नुवन्ति।

1960तमे वर्षे कृषकस्य गोविन्दस्य पार्श्वे अधिकांशतः 2.25हेक्टेयरमिता असिञ्चिता भूमिः आसीत्। गोविन्दः स्वस्य त्रयाणां पुत्राणां साहाय्येन अस्यां भूमौ कृषिं करोति स्म। यद्यपि ते बहु आरामेण न निवसन्तः आसन् तथापि कुटुम्बः स्वस्य एकस्याः महिष्याः द्वारा जायमानेन अतिरिक्तेन आयेन जीवनयापनं कुर्वन् आसीत्। गोविन्दस्य मृत्योः कतिपयवर्षाणाम् अनन्तरं तस्य भूमेः, तस्य त्रिषु पुत्रेषु विभागः कृतः । सम्प्रति एकैकस्य पार्श्वे केवलम् 0.75हेक्टेयरमितः भूमि-खण्डः आसीत्। परन्तु अधुना समीचीनतर-सेचनव्यवस्थासु सतीषु एवञ्च कृषेः आधुनिक-विधिषु सत्सु अपि गोविन्दस्य पुत्राः स्वीयभूम्या जीवनयापनं काठिन्येन कुर्वन्तः आसन्। वर्षस्य कतिपयभागे तैः किञ्चित् अतिरिक्तं कार्यम् अपि अन्वेषणीयं भवति।

1.5चित्रे भवन्तः कञ्चन ग्रामं परितः विकीर्णान् लघून् भूमेः खण्डान् द्रष्टुम् अर्हन्ति । एतेषु खण्डेषु लघुकृषकाः कृषिं कुर्वन्ति। अपरतः ग्रामस्य अर्धाधिक-क्षेत्रे महाकाराः भूमिखण्डाः सन्ति । पालमपुरे मध्यमोच्च-कृषकाणां षष्टिः कुटुम्बाः सन्ति ये द्विहेक्टेयराधिक-भूमौ कृषिं कुर्वन्ति । केषाञ्चन उच्चकृषकाणां पार्श्वे दशहेक्टेयरमिता अथवा ततः अधिका भूमिः अस्ति।



चित्रम् 1.6 क्षेत्रेषु कार्याणि : गोधूमसस्यम् – कर्तनम्, बीजवपनम्, कीटनाशकानाम् अवसेकः तथा च आधुनिक-परम्परागतविधिभिः सस्य-कर्षणम्

आगच्छन्तु चर्चां कुर्याम

- भवन्तः 1.5चित्रे लघुकृषकैः कृषौ प्रयुक्तायाः भूमेः छायाङ्कनं कर्तुं शक्नुवन्ति वा ?
- कृषकाणाम् एतावन्तः अधिकाः कुटुम्बाः एतावत्सु लघुलघु-भूमिखण्डेषु कृषिं किमर्थं कुर्वन्ति ?
- आरेखे 1.1 भारते कृषकाणां तेषां च कृषौ प्रयुक्त-भूमेः वितरणं दत्तम् अस्ति। अस्य विषये कक्षायां चर्चां कुर्वन्तु।

आरेखः 1.1 कृषि-क्षेत्राणां कृषकाणां च वितरणम्



स्रोतः : एग्रीकल्चर स्टेटिसटिक्स एट ए ग्लांस 2006, डिपार्टमेण्ट ऑफ एग्रीकल्चर एण्ड कॉपोरेशन, कृषि-मन्त्रालयः, भारत-शासनम्

आगच्छन्तु चर्चां कुर्याम

- किं भवन्तः एतं विषयं समर्थयन्ति यत् पालमपुरे कृषिभूमेः वितरणम् असमानम् अस्ति ? किं भारते अपि एतादृशी एव स्थितिः अस्ति ? व्याख्यां कुर्वन्तु।

5. श्रमस्य व्यवस्थां कः करिष्यति ?

भूमेः अनन्तरं श्रमः उत्पादनस्य द्वितीयम् आवश्यकं कारकम् अस्ति । कृषौ बह्वधिक-परिश्रमस्य आवश्यकता भवति । लघुकृषकाः स्वीयैः कुटुम्बैः सह स्वीयक्षेत्रेषु स्वयं कार्याणि कुर्वन्ति । अनेन प्रकारेण ते कृषेः कृते आवश्यक-श्रमस्य व्यवस्थां स्वयम् एव कुर्वन्ति । मध्यमोच्च-कृषकाः स्वक्षेत्रेषु कार्याणि कर्तुम् अपरान् श्रमिकान् भाटकेन स्वीकृत्य तान् कार्ये नियोजयन्ति।

आगच्छन्तु चर्चां कुर्याम

- क्षेत्रेषु क्रियमाणानि कार्याणि 1.6चित्रे परिचिन्वन्तु तथा च तेषाम् उचितक्रमेण व्यवस्थापनं कुर्वन्तु।

क्षेत्रेषु कार्याणि कुर्वन्तः श्रमिकाः भूमिहीन-कुटुम्बैः सह सम्बद्धाः भवन्ति अथवा बहुलघुषु भूमिखण्डेषु कार्याणि कुर्वद्भिः कुटुम्बैः सह सम्बद्धाः भवन्ति। क्षेत्रेषु कार्याणि कुर्वतां श्रमिकाणाम् उत्पादित-

अद्यत्वे कार्यं काठिन्येन प्राप्यते । केवलं उच्चकृषकाः एव अस्मान् संरक्षन्ति तदपि स्वल्पदिनानि यावत् ।
घनश्यामः एकः उच्चः कृषकः अस्ति । तेन सद्य एव एकं हार्वेस्टर-यन्त्रं क्रीतम् अस्ति । अतः एव अस्मिन् वर्षे कर्तनऋतौ वयम् इतोऽपि न्यूनं कार्यं प्राप्स्यामः । गतवर्षे अहं सम्पूर्णवर्षे पञ्चमासेभ्यः अपि न्यूनं कार्यं कृतवती ।
अस्माकं पार्श्वे कर्षणार्थं ट्रैक्टरयन्त्राणि, कर्तनाय कर्तक-यन्त्राणि तथा गाहनार्थं थ्रैसर-यन्त्राणि सन्ति । अपि च अवाञ्छितपादपानाम् अपसारणार्थं केचन कृषकाः अवाञ्छितपादपनाशकानां प्रयोगं कुर्वन्ति
मया स्थानीय-सार्थवाहाय 2,000रूप्यकाणि दातव्यानि सन्ति । गतग्रीष्मऋतौ मया 1000रूप्यकाणि स्वीकृतानि आसन् । तदा क्षेत्रेषु कार्यं न आसीत् । अहम् एतस्य धनस्य प्रत्यर्पणं कथं कर्तुं शक्ष्यामि ? प्रातःसायङ्कालस्य भोजनार्थम् अपि काठिन्येन धनार्जनं करोमि ।
अस्मिन् वर्षे मया रायगञ्जे इष्टिका-संयन्त्रस्य अन्वेषणं करणीयं भविष्यति ।
मम स्थितिः समीचीनतरा नास्ति । पूर्वऋणकारणात् कुसीदिनः मह्यं धनं दातुं निषेधं कुर्वन्ति ।

चित्रम् 1.7 डाला-रामकल्योः मध्ये वार्ता । ग्रामस्य सर्वाधिकनिर्धनजनेषु डाला रामकली च अन्यतमौ स्तः ।

सस्यानाम् उपरि कोऽपि अधिकारः न भवति प्रत्युत ते श्रमिकाः तेभ्यः कृषकेभ्यः पारिश्रमिकं प्राप्नुवन्ति येषां कृषकाणां कृते ते कार्याणि कुर्वन्ति । पारिश्रमिकं मुद्रारूपेण भवितुं शक्नोति अथवा अन्नादिकवस्तुरूपेण भवितुम् अर्हति । यदा कदा श्रमिकाः भोजनम् अपि प्राप्नुवन्ति । पारिश्रमिकम् एकस्मात् क्षेत्रात् अपरस्मिन् क्षेत्रे एकस्मात् सस्यात् अपरस्मिन् सस्ये अपि च क्षेत्रे एकस्मात् कार्यात् अपरस्मिन् कार्ये भिन्नं भिन्नं भवति । अर्थात् क्षेत्रे एकस्मात् कृषिकार्यात् अपर-कृषिकार्यस्य कृते (वपन-कर्तनादिकस्य कृते) पृथक् पारिश्रमिकं भवति । जीविकावधौ अपि बह्व्यः भिन्नताः सन्ति । क्षेत्रेषु कार्यं कुर्वाणाः श्रमिकाः दैनिकपारिश्रमिकरूपेण कार्यं कुर्वन्ति अथवा ते कार्यविशेषस्य कृते यथा सस्यकर्तनस्य अथवा सम्पूर्णवर्षस्य कृते कार्यं कर्तुं नियोजयितुं शक्यन्ते ।

डाला पालमपुरे कश्चन भूमिहीनः श्रमिकः अस्ति । अयं दैनिकपारिश्रमिकरूपेण कार्यं करोति । अस्य अयम् आशयः अस्ति यत् तेन निरन्तरं कार्यान्वेषणं करणीयं भवति । सर्वकारेण क्षेत्रेषु कार्याणि कुर्वतां श्रमिकाणां कृते एकस्य दिनस्य कृते 115 रूप्यकाणि (अप्रैल 2011) न्यूनतम-वेतनरूपेण निर्धारितानि

सन्ति । किन्तु डाला केवलम् 80 रूप्यकाणि प्रतिदिनं लभते । पालमपुरे कृषकश्रमिकाणां मध्ये महती स्पर्धा अस्ति अतः जनाः न्यूनेन वेतनेन अपि कार्यं कर्तुं सहमताः भवन्ति । डाला रामकलीं स्वस्थितिविषये विज्ञापयति । रामकली काचिद् अन्या कृषकश्रमिका अस्ति । डाला एवञ्च रामकली ग्रामस्य निर्धनतमेषु जनेषु अन्यतमौ स्तः।

आयान्तु चर्चां कुर्मः

- डाला-रामकली-सदृशाः कृषक-श्रमिकाः किमर्थं निर्धनाः सन्ति ?
- गोसाईंपुरम् एवञ्च मझौली उत्तरबिहारस्य द्वौ ग्रामौ स्तः । द्वयोः ग्रामयोः आहत्य 850 कुटुम्बाः सन्ति तेषां 250तः अधिकाः पुरुषाः एतादृशाः सन्ति ये पञ्जाब-हरियाणयोः ग्रामीण-क्षेत्रेषु अथवा देहली-मुम्बई-सूरत-हैदराबाद-नागपुरेषु कार्यं कुर्वन्तः सन्ति । एतादृशः प्रवासः भारतस्य अधिसङ्ख्येषु भारतीय-ग्रामेषु भवति । जनाः प्रवासं केन कारणेन कुर्वन्ति? किं भवन्तः अस्य व्याख्याम् (स्वकल्पनाम् आधारीकृत्य) कर्तुम् अर्हन्ति यत् गोसाईंपुर-मझौली-ग्रामयोः प्रवासिनः स्वगन्तव्येषु कीदृशं कार्यं कुर्वन्तः स्युः?

6. क्षेत्राणां कृते आवश्यकं धनम्

भवन्तः पूर्वमेव दृष्टवन्तः सन्ति यत् कृषिकार्यस्य आधुनिकविधीनां कृते बहुपरिसम्पत्तेः आवश्यकता भवति अतः इदानीं कृषकाणां कृते पूर्वापेक्षया अधिकं धनम् अपेक्ष्यते ।

1. अधिसङ्ख्य-लघुकृषकैः धनव्यवस्थां कर्तुं धनम् ऋणरूपेण स्वीकरणीयं भवति । ये उच्चकृषकेभ्यः अथवा ग्रामसार्थवाहेभ्यः अथवा कृषिकार्यस्य कृते विभिन्नागतानां पूर्तिं कुर्वद्भ्यः वणिग्भ्यः ऋणं स्वीकुर्वन्ति । एतादृशानाम् ऋणानां कुसीदमितिः अत्यधिका भवति । ऋणं प्रत्यर्पयितुं ते बहुकष्टानि सहन्ते ।

सवितायाः कथा

सविता काचित् सामान्या कृषिका अस्ति । सा एकहेक्टेयरपरिमित-भूमौ गोधूम-वपनस्य योजनां निर्माति । बीजानि कीटनाशकानि च अतिरिच्य सेचनजलस्य क्रयणाय उपकरणानां संस्करणाय च रोकरूप्यकाणि अपेक्ष्यन्ते । तस्याः अनुमानम् अस्ति यत् कार्यशील-परिसम्पत्तिरूपेण एव तस्याः कृते 3000 रूप्यकाणि अपेक्ष्यन्ते । तस्याः पार्श्वे धनं नास्ति । अतः सा उच्चकृषकात् तेजपालात् ऋणं स्वीकर्तुं निर्णयं करोति । तेजपालसिंहः सवितायै प्रतिशतं 24 कुसीदमित्या चतुरः मासान् यावत् ऋणं दातुं सिद्धः भवति । इयं कुसीदमितिः बह्वधिका अस्ति । सविता अपि एतदपि वचनं ददाति यत् सस्यकर्तनसमये सा तस्य क्षेत्रेषु श्रमिकरूपेण प्रतिदिनम् 35 रुप्यकैः कार्यं करिष्यति । भवन्तः अपि वक्तुं शक्नुवन्ति यत् एतत् पारिश्रमिकम् अत्यधिकम् अल्पम् अस्ति । सविता जानाति यत् तया स्वक्षेत्रस्य सस्यकर्तनाय बहुपरिश्रमः करणीयः भविष्यति ततः परं तया तेजपालस्य क्षेत्रेषु श्रमिकरूपेण कार्यं करणीयं भविष्यति । सस्यकर्तनकालः बहुव्यस्तः कालः भवति । सा त्रयाणां शिशूनां माता अस्ति । तस्याः गृहस्य अपि बहु विधानि दायित्वानि सन्ति । सविता एतान् कठोरान् अनुबन्धान् अङ्गीककर्तुं सिद्धा भवति यतो हि सा जानाति यत् सामान्यकृषकाः ऋणं बहुकाठिन्येन प्राप्नुवन्ति ।

2. सामान्यकृषकाणाम् अपेक्षया मध्यमोच्चवर्गीयाः कृषकाः कृषितः लाभं प्नाप्नुवन्ति । अनेन प्रकारेण ते आवश्यकधनस्य व्यवस्थां कुर्वन्ति । एते कृषकाः कथं लाभम् प्राप्नुवन्ति? भवन्तः अस्य उत्तरम् अग्रिमे भागे प्राप्स्यन्ति ।

कथा अधुना यावत्

वयं भूमिः, श्रमः एवञ्च परिसम्पत्तिः इत्येतेषाम् उत्पादनस्य त्रयाणां कारकाणां विषये क्षेत्रेषु च तेषां प्रयोगविषये पठितवन्तः । आयान्तु अधुना रिक्तस्थानानि पूरयामः -----

उत्पादनस्य त्रिषु कारकेषु श्रमः उत्पादनस्य सर्वाधिकप्रचुरमात्रायाम् उपलब्धं कारकम् अस्ति । एतादृशाः नैकाः जनाः सन्ति ये ग्रामेषु कृषक-श्रमिकरूपेण तदा कार्यं कर्तुं सिद्धाः सन्ति यदा हि कार्यस्य अवसराः न्यूनाः सन्ति । ते प्रायः भूमिहीनकुटुम्बैः सह सम्बद्धाः सन्ति अथवा ..... । ते स्वल्पं वेतनं लभन्ते एवञ्च काठिन्येन जीवनं जीवन्ति ।

श्रम-वैपरीत्येन , ... उत्पादनस्य एकं दुर्लभं कारकम् अस्ति । कृषिभूमेः क्षेत्रम् ..... अस्ति ।

एतद् अतिरिच्य उपलब्ध-भूमेः अपि ..... (समाना / असमाना) रूपेण कृषिकार्ये संलग्नानां जनानां मध्ये

वितरणम् अस्ति । एतादृशाः अनेके लघुकृषकाः सन्तिः ये भूमेः लघुखण्डेषु कृषिं कुर्वन्ति येषां च स्थितिः भूमिहीन-कृषकश्रमिकेभ्यः भद्रतरा नास्ति । उपलब्ध-भूमेः अधिकाधिकं प्रयोगं कर्तुं कृषकाः --------- अथ च ---------- उपयोगं कुर्वन्ति । एतद्-द्वयस्य द्वारा सस्योत्पादनस्य वृद्धिः भवति ।

कृषेः आधुनिक-विधिषु ---------- महती आवश्यकता भवति । लघुकृषकैः सामान्यरूपेण परिसम्पत्तेः व्यवस्थां कर्तुम् ऋणरूपेण धनं स्वीकरणीयं भवति अपि च ते ऋणं प्रत्यर्पयितुं बहूनि कष्टानि सहन्ते । अतः विशेषरूपेण लघुकृषकाणां कृते परिसम्पत्तिः अपि उत्पादनस्य एकं दुर्लभं कारकम् अस्ति ।

यद्यपि भूमिः परिसम्पत्तिः च इति उभयं दुर्लभम् अस्ति । उत्पादनस्य एतयोः उभयोः कारकयोः मध्ये एकः मूलभेदः अस्ति । ---------- प्राकृतिक-संसाधनम् अस्ति अपरञ्च ---------- मानव-निर्मितम् अस्ति । परिसम्पत्तेः वर्धनं सम्भवम् अस्ति अपरञ्च भूमिः स्थिरा अस्ति । अतः एतद् अतीव आवश्यकम् अस्ति यत् भूम्यां कृषौ च प्रयुक्तानाम् अन्येषां संसाधनानां सम्यक्तया संरक्षणं कुर्याम इति ।

7. अधिशेषकृष्युत्पादानां विक्रयः

कल्पनां कुर्वन्तु यत् कृषकाः उत्पादनस्य त्रयाणां कारकाणां प्रयोगं कृत्वा स्वक्षेत्रेषु गोधूमस्य उत्पादनं कृतवन्तः सन्ति । गोधूमस्य कर्तनं क्रियते अथ च उत्पादनं पूर्णं जायते । कृषकाः गोधूमेन किं कुर्वन्ति ? ते कुटुम्बस्य उपभोगार्थं किञ्चित्-परिमाणेन गोधूमं स्थापयन्ति अधिशेष-गोधूमस्य च विक्रयणं कुर्वन्ति । सविता-गोविन्दयोः पुत्रैः सदृशानां लघु-कृषकाणां पार्श्वे बहुन्यूनमात्रायाम् अधिशेषगोधूमः प्राप्यते यतो हि तेषां समग्रम् उत्पादनं बहुन्यूनं जायते अपि च अस्य उत्पादनस्य अधिकभागं कुटुम्बस्य आवश्यकताः पूरयितुं स्थापयन्ति । अतः एव मध्यमोच्चकृषकाः एव आपणेषु गोधूमस्य पूर्तिं कुर्वन्ति । 1.1चित्रे भवन्तः गोधूम-भरितानि आपणं गच्छन्ति गोशकटानि द्रष्टुं शक्नुवन्ति । आपणिक-व्यापारिणः तस्य गोधूमस्य क्रयणं कृत्वा नगरोपनगराणाम् आपणिकेभ्यः विक्रयं कुर्वन्ति ।

तेजपालसिंहनामकः कश्चन उच्चकृषकः स्वीयसमस्तभूमितः 350क्विण्टलपरिमितम् अधिशेष-गोधूमं प्राप्नोति । स्वीयम् अतिरिक्तं गोधूमं सः रायगञ्जस्य आपणे विक्रीणीते । सन्तोषप्रदम् अर्जनं करोति ।

तेजपालसिंहः अनेन अर्जनेन किं करोति ? गतवर्षे तेजपालसिंहेन अधिकतरं धनं स्वीयवित्तकोषलेखायां निहितम् । अनन्तरं सः अस्य धनस्य उपयोगं येषां कृते ऋणस्य आवश्यकता आसीत् पुनश्च सवितासदृशेभ्यः लघुकृषकेभ्यः ऋणं दातुं कृतवान् । सः लाभस्य उपयोगम् अग्रिमऋतुकालिक-कृषेः कृते कार्यशील-परिसम्पत्तेः व्यवस्थां कर्तुम् अपि कृतवान् । अस्मिन् वर्षे तेजपालसिंहः लाभ-धनेन एकम् इतोऽपि ट्रैक्टर्-यन्त्रं क्रेतुं योजनां चिन्तयन् अस्ति । द्वितीयेन ट्रैक्टर्-यन्त्रेण तस्य स्थिर-परिसम्पत्तौ वृद्धिः भविष्यति ।

तेजपालसदृशाः अन्ये मध्यमोच्चकृषकाः अपि कृषेः अधिशेष-कृष्युत्पादानां विक्रयणं कुर्वन्ति । अर्जितधनस्य एकांशः अग्रिमऋतोः कृते परिसम्पत्तेः व्यवस्थां कर्तुं संरक्ष्यते । अनेन प्रकारेण ते स्वीयकृषिनिमित्तं परिसम्पत्तेः व्यवस्थां स्वीयलाभेन एव कुर्वन्ति । केचन कृषकाः लाभस्य उपयोगं पशु-ट्रकादीनि क्रेतुम् अथवा आपणम् उद्घाटयितुम् अपि कुर्वन्ति । यथा वयं द्रक्ष्यामः यत् एतत् सर्वं कृषिभिन्न-कार्याणां कृते परिसम्पत्ति-शब्देन ज्ञायते ।

पालमपुरे कृषिभिन्न-क्रियाः

अस्माभिः दृष्टं यत् पालमपुरे कृषिः एव प्रमुखा उत्पादनक्रिया अस्ति । अधुना वयं कासाञ्चन कृषिभिन्न-क्रियाणां विषये विचारं करिष्यामः । पालमपुरे कार्याणि कुर्वन्तः प्रतिशतं 25 मिताः जनाः कृषिम् अतिरिच्य अन्य-कार्याणि कुर्वन्ति ।

1. दुग्धोत्पादनम् – अन्या प्रचलित-क्रिया

पालमपुरस्य अनेकेषु कुटुम्बेषु दुग्धोत्पादनम् एका प्रचलित-क्रिया अस्ति । जनाः स्वीयाः महिषीः बहुविधान् घासान् वर्षाऋतौ च उत्पद्यमानं यवनालं प्रियङ्गुं च भोजयन्ति । दुग्धं निकटवर्तिनि विशाले ग्रामे रायगञ्जे विक्रीयते । शाहपुरनगरस्य द्वौ व्यापारिणौ रायगञ्जे दुग्ध-संग्रहणकेन्द्रम् अथ च शीतलन-केन्द्रम् उद्घाटितवन्तौ स्तः । इतः दुग्धं दूरवर्ति-नगरोपनगरान् प्रति प्रेष्यते ।

आगच्छन्तु चर्चां कुर्याम

- वयं त्रयाणां कृषकाणाम् उदाहरणानि स्वीकुर्मः। एकैकः स्वस्वक्षेत्रे गोधूमम् उप्तवान् अस्ति। यद्यपि तेषाम् उत्पादनं भिन्नं भिन्नम् अस्ति (स्तम्भं 2 पश्यन्तु, द्वितीयः कृषकः)। प्रत्येकं कृषकस्य कुटुम्बेन गोधूमस्य उपभोगः समानरूपेण क्रियते (स्तम्भम् 3 पश्यन्तु, तृतीयः कृषकः)। अस्य वर्षस्य समस्ताधिशेष-गोधूमस्य उपयोगः आगामिवर्षे उत्पादनार्थं परिसम्पत्तिरूपेण क्रियते। एतद् अपि स्वीकुर्वन्तु यत् उत्पादनम् अस्मिन् प्रयुज्यमानायाः परिसम्पत्तेः द्विगुणितं भवति। सारणीः पूरयन्तु -

प्रथमः कृषकः

	उत्पादनम्	उपभोगः	अधिशेषोत्पादनोपभोगः	अग्रिमवर्षस्य कृते परिसम्पत्तिः
प्रथमः वर्गः	100	40	60	60
द्वितीयः वर्गः	120	40		
तृतीयः वर्गः		40		

द्वितीयः कृषकः

	उत्पादनम्	उपभोगः	अधिशेषोत्पादनोपभोगः	अग्रिमवर्षस्य कृते परिसम्पत्तिः
प्रथमः वर्गः	80	40		
द्वितीयः वर्गः		40		
तृतीयः वर्गः		40		

तृतीयः कृषकः

	उत्पादनम्	उपभोगः	अधिशेषोत्पादनोपभोगः	अग्रिमवर्षस्य कृते परिसम्पत्तिः
प्रथमः वर्गः	60	40		
द्वितीयः वर्गः		40		
तृतीयः वर्गः		40		

- त्रयाणां कृषकाणां वर्षत्रये जातस्य गोधूमस्य उत्पादनस्य तुलनां कुर्वन्तु।
- तृतीये वर्षे तृतीयेण कृषकेण सह किम् अभवत् ? किं स निरन्तरम् उत्पादनं कर्तुं शक्नोति ? निरन्तरम् उत्पादनं कर्तुं तेन किं करणीयं भविष्यति ?

2. पालमपुरे लघुस्तरीयविनिर्माणस्य एकम् उदाहरणम् –

अस्मिन् समये पालमपुरे पञ्चाशतः न्यूनं जनाः विनिर्माण-कार्ये निरताः सन्ति। नगरोपनरेषु विशाल-शिल्पशालासु क्रियमाणस्य विनिर्माणस्य विपरीतं पालमपुरे विनिर्माणे बहुसरलाः उत्पादन-विधयः प्रयुज्यन्ते तच्च लघुस्तरे क्रियते। विनिर्माण-कार्यं पारिवारिक-श्रमस्य साहाय्येन अधिकतरं गृहेषु क्षेत्रेषु वा क्रियते। श्रमिकाः यदा कदा एव भाटकेन नियोज्यन्ते।

मिश्रीलालस्य कथा

मिश्रीलालः एकम् इक्षुदण्डपेषणोपकरणं क्रीतवान् अस्ति । एतद् उपतरणं विद्युता चलति । सः उपकरणम् एतद् स्वीये क्षेत्रे स्थापितवान् अस्ति । पूर्वम् इक्षुदण्ड-पेषणस्य कार्यं बलीवर्दैः क्रियते स्म परन्तु अधुना एतत् कार्यं जनेभ्यः उपकरणद्वारा रोचते । मिश्रीलालः अपरेभ्यः कृषकेभ्यः अपि इक्षुदण्डं क्रीणाति तेन च गुडस्य निर्माणं करोति । पुनश्च गुडं शाहपुरस्य व्यापारिभ्यः विक्रीणीते । अनया प्रक्रियया मिश्रीलालः कञ्चन लाभं प्राप्नोति ।

करीमस्य कथा

करीमः ग्रामे एकं सङ्गणककेन्द्रम् उद्घाटितवान् अस्ति । सद्यस्तनेषु वर्षेषु बहवः विद्यार्थिनः शाहपुरनगरस्य विद्यालयं गन्तुम् आरब्धवन्तः सन्ति । करीमः अपश्यत् यत् ग्रामस्य अनेके छात्राः नगरस्य सङ्गणक-कक्षासु गच्छन्ति । ग्रामस्य द्वयोः महिलयोः पार्श्वे सङ्गणकानुप्रयोगस्य उपाधिः अस्ति । सः ते महिले कर्मणि नियोजयितुं निश्चयम् अकरोत् । तेन सङ्गणकाः क्रीताः । स्वीये गृहे आपणाभिमुखम् उद्घटिते बहिस्तने कक्षे कक्षाः प्रारब्धवान् । हाईस्कूलच्छात्राः पर्याप्तसङ्ख्यायाम् एतासु कक्षासु आगन्तुम् आरब्धवन्तः।

आगच्छन्तु चर्चां कुर्याम

- गुडनिर्माणस्य उत्पादन-घटकं स्थापयितुं मिश्रीलालस्य कृते कियती परिसम्पत्तिः आवश्यकी अवर्तत ?
- अस्मिन् कार्ये श्रमस्य उपलब्धतां कः कारयति ?
- किं भवन्तः अनुमानं कर्तुं शक्नुवन्ति यत् मिश्रीलालः स्वीयलाभवर्धने किमर्थं समर्थः नास्ति ?
- किं भवन्तः एतादृशानां कारणानां विषये चिन्तयितुं शक्नुवन्ति यैः मिश्रीलालस्य हानिः अपि भवितुं शक्नोति ?
- मिश्रीलालः स्वीयं गुडं ग्रामे न विक्रीय शाहपुरस्य व्यापारिभ्यः किमर्थं विक्रीणीते ?

आगच्छन्तु चर्चां कुर्याम

- करीमस्य परिसम्पत्तिः एवञ्च श्रमः मिश्रीलालस्य परिसम्पत्तेः श्रमात् च केन रूपेण भिन्नौ स्तः ?
- इतःपूर्वंकेनचिद्अन्येनसङ्गणक-केन्द्रंकिमर्थंनसमारब्धम्? सम्भावित-कारणानां चर्चां कुर्वन्तु ।

3. पालमपुरस्य आपणिकाः

पालमपुरे अधिकतर-जनाः व्यापारं (वस्तु-विनिमयम्) न कुर्वन्ति । पालमपुरस्य व्यापारिणः ते आपणिकाः सन्ति ये नगरस्य समूहापणेभ्यः बहूविधानि वस्तूनि क्रीणन्ति पुनश्च ग्रामम् आनीय तेषां विक्रयं कुर्वन्ति । भवन्तः द्रक्ष्यन्ति यत् ग्रामेषु लघुसामान्यापणेषु तण्डुलः, गोधूमः, चायम्, तैलम्, सुपिष्टकम्, फेनकम्, दन्तफेनकम्, विद्युत्कोषः, सिक्थवर्तिका, टिप्पणीपुस्तिका, लेखनी किं बहुना वस्त्राणि अपि विक्रीयन्ते । येषां गृहाणि बसस्थानकानां निकटे सन्ति तादृशाः केचन कुटुम्बाः स्वीयगृहाणां कस्मिंश्चिद् भागे लघुम् आपणम् उद्घाटितवन्तः सन्ति । ते खाद्यवस्तूनि विक्रीणन्ते ।

4. परिवहनम् : तीव्रगत्या विकसत् क्षेत्रकम्

पालमपुरस्य रायगञ्जस्य च मध्ये मार्गे बहुप्रकारकाणि वाहनानि चलन्ति । परिवहन-सेवासु रिक्शाचालकाः, अश्वशकटचालकाः, जीप-ट्रैक्टर-ट्रकचालकाः तथा च परम्परागतगोशकटचालकाः तथा च अन्यशकटचालकाः समाविष्टाः सन्ति । एते जनान् वस्तूनि च एकस्थानात् अपरस्थानं प्रति नयन्ति एतत्-स्थाने च ते धनं प्राप्नुवन्ति । गतेषु बहुषु वर्षेषु परिवहनेन सम्बद्धानां जनानां संख्या बहु वर्धिता अस्ति ।

किशोरस्य कथा

किशोरः एकः कृषक-श्रमिकः अस्ति । अन्येषाम् एतादृशानाम् एव श्रमिकाणाम् इव किशोरस्य कृते स्वपारिश्रमिकेण स्वकुटुम्बस्य आवश्यकता-पूर्तिः कठिनतया भवति स्म । कतिपयवर्षेभ्यः पूर्वं किशोरः वित्तकोषात् ऋणं स्वीकृतवान् । सर्वकारसम्बद्ध-कार्यक्रमान्तर्गतं भूमिहीन-निर्धनकुटुम्बेभ्यः अल्पकुसीदमित्या ऋणं प्रदीयमानम् आसीत् । किशोरः अनेन धनेन एकां महिषीं क्रीतवान् । अधुना सः महिष्याः दुग्धं विक्रीणीते ।

अधुना तेन स्वीयः महिषशकटः अपि निर्मितः अस्ति । अनेन सः बहुविधानि वस्तूनि आनयति । सप्ताहे एकवारं सः कुम्भकारस्य कृते गङ्गातटात् मृत्तिकाम् आनयति । यदा कदा सः गुडम् अथवा अन्यानि वस्तूनि स्वीकृत्य शाहपुरं गच्छति । प्रत्येकस्मिन् मासे सः परिवहनसम्बद्धं किमपि कार्यं प्राप्नोति। परिणामतः किशोरः गतवर्षाणाम् अपेक्षया अधुना अधिकम् अर्जनं कुर्वन् अस्ति ।

आगच्छन्तु चर्चां कुर्याम

- किशोरस्य स्थायिपरिसम्पत्तिः का अस्ति ?
- किं भवन्तः चिन्तयितुं शक्नुवन्ति यत् तस्य कार्यशीलपरिसम्पत्तिः कियती स्यात् ?
- किशोरः कतिषु उत्पादन-क्रियासु निरतः अस्ति ?
- किं भवन्तः कथयितुं शक्नुवन्ति यत् किशोरः पालमपुरस्य उत्तममार्गेभ्यः लाभं प्राप्तवान् अस्ति ?

सारांशः

ग्रामेषु कृषिः मुख्या उत्पादन-क्रिया अस्ति । गतवर्षेषु कृषि-विधिषु अनेकानि महत्त्वपूर्ण-परिवर्तनानि अभवन् । एतत्-कारणेन कृषकाः तावद्-भूमितः एव अधिकं सस्यम् उत्पादयितुं समर्थाः सन्ति । एतद् एका महत्त्वपूर्णा उपलब्धिः अस्ति यतो हि भूमिः स्थायिनी दुर्लभा च वर्तते । उत्पादनं वर्धयितुं भूमेः एवञ्च अन्यप्राकृतिक-संसाधनानाम् उपरि बह्वधिकः भारः जातः ।

कृषेः नूतनविधिषु न्यून-भूमेः अधिक-परिसम्पत्तेः आवश्यकता भवति । मध्यमोच्चकृषकाः स्वीयात् उत्पादनात् जातेन लाभेन अग्रिमऋतोः कृते परिसम्पत्तेः व्यवस्थां कुर्वन्ति । अपरतः भारते लघुकृषकाः कृषकाणां सम्पूर्णजनसंख्यायाः 80 प्रतिशतमिताः सन्ति । एतेषां लघुकृषकाणां कृते परिसम्पत्तेः व्यवस्था बहुकठिनतया भवति । तेषां भूखण्डस्य आकारः लघुः भवति इति कारणात् तेषाम् उत्पादनं पर्याप्तं न भवति। अतिरिक्त-साधनानां न्यूनता अस्ति इति कारणात् ते स्वीयलाभात् परिसम्पत्तेः व्यवस्थां कर्तुं समर्थाः न भवन्ति । अतः तैः ऋणं स्वीकरणीयं भवति । ऋणम् अतिरिच्य बहुभिः लघुकृषकैः स्वस्य स्वीयकुटुम्बानां च भरण-पोषणार्थं कृषक-श्रमिकरूपेण अतिरिक्त-कार्यं करणीयं भवति ।

श्रमः उत्पादनस्य अन्य-कारकाणाम् अपेक्षया सर्वाधिकम् आधिक्येन अस्ति । अतः नूतन-विधिषु श्रमस्य अधिकः प्रयोगः आदर्शत्वेन स्यात् परन्तु दुर्भाग्यवशात् न अभवत् । कृषौ श्रमिकाणाम् उपयोगः सीमितः अस्ति । अवसराणाम् अन्वेषणे श्रमिकाः प्रतिवेशि-ग्रामान् नगरोपनगराणि च गच्छन्तः सन्ति । केचन श्रमिकाः ग्रामेषु एव कृषिभिन्न-क्षेत्रेषु कार्यं कर्तुम् आरब्धवन्तः ।

अस्मिन् समये कृषिभिन्न-क्षेत्रकं बहुविस्तृतं नास्ति । भारते ग्रामीण-क्षेत्राणां शते श्रमिकेषु केवलं चतुर्विंशतिः श्रमिकाः एव कृषिभिन्नकार्येषु निरताः सन्ति । यद्यपि ग्रामेषु अनेकविधानि कृषिभिन्नकार्याणि भवन्ति (अस्माभिः कानिचन एव उदाहरणानि एव दृष्टानि सन्ति) । प्रत्येकस्मिन् कार्ये नियुक्त-जनानां संख्या बहुन्यूना अस्ति ।

वयम् एषिष्यामः यत् भाविसमये ग्रामेषु कृषिभिन्नासु उत्पादनक्रियासु अपि वृद्धिः भवेत् । कृषेः विपरीतं कृषिभिन्न-कार्येषु न्यूना भूमिः आवश्यकी भवति । जनाः अल्प-परिसम्पत्ति-द्वारा अपि कृषिभिन्न-कार्याणि प्रारब्धुं शक्नुवन्ति । इयं परिसम्पत्तिः कथं प्राप्यते ? स्वीय-लाभस्य एव प्रयोगः क्रियते अथवा ऋणं स्वीक्रियते । ऋणं न्यूनकुसीदमित्या उपलब्धं भवेत् इति आवश्यकता भवति येन हि लाभहीनाः जनाः अपि कृषिभिन्न-कार्याणि कर्तुं शक्नुयुः । कृषिभिन्न-कार्याणां प्रसाराय एतद् अपि आवश्यकम् अस्ति यत् तादृशाः आपणाः स्युः यत्र वस्तूनि सेवाश्च विक्रेतुं शक्येरन् । पालमपुरे वयं दृष्टवन्तः यत् प्रतिवेशि-ग्रामेषु नगरोपनगरेषु दुग्धं गोधूमः गुडं चेति उपलब्धम् अस्ति । यथा यथा अधिकाधिकाः ग्रामाः नगरैः उपनगरैः सुन्दरमार्गैः परिवहनैः दूरभाषैः च सह संयुक्ताः भविष्यन्ति तथा भविष्ये ग्रामेषु कृषिभिन्नोत्पादन-क्रियाणाम् अवसराः वर्धिष्यन्ते ।

अभ्यासः

1. भारते जनगणनावधौ दशसु वर्षेषु एकवारं प्रत्येकं ग्रामस्य सर्वेक्षणं क्रियते। पालमपुरेण सम्बद्धाः सूचनाः आधारीकृत्य निम्नतालिकां पूरयन्तु

(क) अवस्थिति-क्षेत्रम्

(ख) ग्रामस्य सकलक्षेत्रम्

(ग) भूमेः उपयोगः (हेक्टेयरमानेन)

कृषि-भूमिः		कृषेः कृते अनुपलब्धा भूमिः (निवास-स्थान-मार्ग-सरोवर-गोचरणादीनां क्षेत्राणि)
सिक्ता	असिक्ता	
		26हेक्टेयर्

(घ) सौविध्यानि

शैक्षिकम्	
चिकित्सा	
आपणः	
विद्युत्-पूर्तिः	
संचारः	
निकटतम-नगरम्	

2. कृषेः आधुनिकविधीनां कृते एतादृशानि अधिकानि आगतानि आवश्यकानि भवन्ति येषां विनिर्माणम् उद्योगेषु क्रियते, किं भवन्तः अनेन तथ्येन सहमताः सन्ति ?

3. पालमपुरे विद्युत्प्रसारेण कृषकाणां साहाय्यं केन प्रकारेण अभवत् ?

4. किं सिञ्चितक्षेत्रस्य वर्धनं महत्त्वपूर्णम् अस्ति? किमर्थम् ?

5. पालमपुरस्य 450कुटुम्बेषु भूमेः वितरणस्य एकां सारणीं निर्मान्तु।

6. पालमपुरे कृषकश्रमिकाणां पारिश्रमिकं न्यूनतम-पारिश्रमिकात् न्यूनं किमर्थम् अस्ति ?

7. स्वक्षेत्रेद्वाभ्यांश्रमिकाभ्यांसहवार्तांकुर्वन्तु।क्षेत्रेषुकार्याणिकुर्वत्सुअथवाविनिर्माणकायेषुरतेषुश्रमिकेषुकमपिपरिचिन्वन्तु। ते कियत् पारिश्रमिकं प्राप्नुवन्ति ? किं ते रोकधनं प्राप्नुवन्ति अथवा वस्तुरूपेण प्राप्नुवन्ति ? किं ते नियमितरूपेण कार्यं प्राप्नुवन्ति ? किं ते ऋणिनः सन्ति ?

8. एकस्याम् एव भूमौ उत्पादन-वर्धनस्य पृथक् पृथक् विधयः के सन्ति ? बोधयितुम् उदाहरणानां प्रयोगं कुर्वन्तु।

9. एकहेक्टेयरमितभूमेः स्वामिनः कृषकस्य कार्यविवरणं ददतु।

10. मध्यमोच्चकृषकाः कृषितः परिसम्पत्तिं कथं प्राप्नुवन्ति ? ते लघुकृषकेभ्यः कथं भिन्नाः सन्ति ?

11. कान् अनुबन्धान् कृत्वा सविता तेजपालसिंहात् ऋणम् अलभत ? किं कुसीदस्य न्यूनमित्या वित्तकोषात् ऋणे लब्धे सति सवितायाः स्थितिः पृथक् अभविष्यत् ?

12. स्वक्षेत्रस्य कैश्चित् पुरातनैः निवासिभिः सह वार्तां कुर्वन्तु तथा च गतेषु त्रिंशद्-वर्षेषु सेचनस्य उत्पादनस्य च विधिषु जातानि परिवर्तनानि अधिकृत्य एकाम् आख्यां लिखन्तु।

13. भवतां क्षेत्रे कानि कानि कृषिभिन्नानि उत्पादन-कार्याणि क्रियमाणानि सन्ति ? एतद् अधिकृत्य एकां सूचीं निर्मान्तु।

14. ग्रामेषु इतोऽपि अधिकतया कृषिभिन्नानि कार्याणि प्रारब्धुं किं कर्तुं शक्यते ?

सन्दर्भः

एटीनः, गिलबर्टः, 1985, रूरल डेवलपमेण्ट इन एशिया : मीटिङ्ग्स विद पीजेण्ट्स, सेज पब्लिकेशन्स, नवदेहली।

एटीनः, गिलबर्टः, 1988, फूड एण्ड पावर्टी : इण्डियाज हाफ वन बैटल, सेज पब्लिकेशन्स, नवदेहली।

राजः, के.एन., 1991, विलेज इण्डिया एण्ड इट्स पॉलिटिकल इकोनॉमी, सी.टी. कुरियनद्वारा सम्पादितम् इकोनॉमी, सोसायटी एण्ड डेवलपमेण्ट, सेज पब्लिकेशन्स, नवदेहली।

थार्नरः, डेनियलः थार्नरः च, एलीसः, 1962, लैण्ड एण्ड लेबर इन इण्डिया, एशिया पब्लिशिंग हाउस, मुम्बई

2
अध्यायः

संसाधनरूपेण जनाः

अवलोकनम्

संसाधनरूपेण जनाः इत्यस्मिन् अध्याये अर्थव्यवस्थोपरि दायित्वाधिकपरिसम्पत्तिरूपेण व्याख्यां कर्तुं प्रयत्नः कृतः अस्ति। यदा शिक्षा-प्रशिक्षण-चिकित्सासेवासु निवेशः क्रियते तदा सा एव जनसंख्या मानवपरिसम्पत्तिरूपेण परिवर्तते । वस्तुतः **मानव-परिसम्पत्तिः** कौशलस्य अथ च तेषु निहितोत्पादनस्य संग्रहः अस्ति।

केन प्रकारेण समीचीनतरम् उत्पादनं प्रौद्योगिकीरूपेण अधिकज्ञानरूपि आगतं दुर्लभ-भूमिसंसाधनस्य उत्पादकतायां तीव्र-वृद्धिम् आनेतुं शक्नोति इत्यस्य भारतस्य हरित-क्रान्तिः एकं नाटकीयम् उदाहरणम् अस्ति । भौतिक-यन्त्रीकरणम् अथ च शालानाम् अपेक्षया मानव-परिसम्पत्तेः महत्त्वं केन प्रकारेण उच्चं स्थानं प्राप्तम् अस्ति इत्यस्य भारतस्य सूचना-प्रौद्योगिक्यां क्रान्तिः एकम् आश्चर्यकारि उदाहरणम् अस्ति ।

स्रोतः योजनायोगः (नीत्यायोगः)

परिचयः

संसाधनरूपेण जनाः इति वर्तमानोत्पादनकौशलस्य अथ च क्षमतानां सन्दर्भे कस्यचित् देशस्य कार्यरतजनानां वर्णनस्य विधिः अस्ति । उत्पादकपक्ष-दृष्ट्या जनसंख्याविषये विचारणं सकलराष्ट्रियोत्पादस्य सर्जने तेषां योगदान-क्षमताम् अभिलक्ष्य सबलम् अवधानं करोति । अन्यसंसाधनानि इव जनसंख्या अपि एकं संसाधनम् अस्ति तच्च मानव-संसाधनम् इति कथ्यते । एतत् विशालजनसंख्यायाः एकः सकारात्मकपक्षः अस्ति यश्च प्रायः तस्मिन् समये अनपेक्ष्यते यदा वयम् अस्य नकारात्मकपक्षं पश्यामः । यथा भोजन-शिक्षा-स्वास्थ्यसम्बन्धिसेवानां जनसंख्यां यावद् प्राप्तेः समस्या-विषये चिन्तयामः । यदा एतत् विद्यमानं जनसंख्या-संसाधनम् इतोऽपि शिक्षा-स्वास्थ्यद्वारा इतोऽपि विकसितः क्रियते यदा एतद् **मानव-परिसम्पत्ति-निर्माणम्** इति कथ्यते। एतद् मानव-परिसम्पत्ति-निर्माणं भौतिक-परिसम्पत्ति-निर्माणम् इव देशस्य उत्पादक-शक्तौ वृद्धिं करोति।

मानव-परिसम्पत्तौ निवेशः (शिक्षा, प्रशिक्षणम् अथ च स्वास्थ्यसेवा इत्यादीनां द्वारा) भौतिक-परिसम्पत्तिः इव प्रतिफलं प्रयच्छति । अधिक-शिक्षितानाम् अथवा समीचीनतर-प्रशिक्षितानां जनानाम् उच्चोत्पादकता-कारणात् जायमानः आयः सममेव अधिकस्वस्थ-जनानाम् उच्चोत्पादकतारूपेण प्रत्यक्षतः द्रष्टुं शक्यते ।

चित्रम् २.१ मानवपरिसमपत्तिः

आगच्छन्तु चर्चां कुर्याम

- चित्रं 2.1 दृष्ट्वा किं भवन्तः वक्तुं शक्नुवन्ति यत् चिकित्सकः अभियन्ता तथा च सौचिकः अर्थव्यवस्थायाः कृते किमर्थम् आवश्यकाः सन्ति ?

उच्च-आयात् न केवलम् अधिक-शिक्षित-जनानाम् अथ च अधिक-स्वस्थ-जनानां लाभः भवति अपितु समाजस्य अपि अप्रत्यक्षविधितः लाभः भवति यतो हि अधिकशिक्षितायाः अथवा अधिकस्वस्थायाः जनसंख्यायाः लाभः तेषां जनानां कृते अपि भवति ये स्वयं प्रत्यक्षतः तावन्तः शिक्षिताः न सन्ति अथवा तेभ्यः तावत्यः स्वास्थ्य-सेवाः न प्रदत्ताः सन्ति। वस्तुतः मानव-परिसम्पत्तिः भूमेः भौतिक-परिसम्पत्तेः च श्रेष्ठा अस्ति यतो हि मानव-संसाधनं भूमेः परिसम्पत्तेः च उपयोगं कर्तुं शक्नोति। भूमिः परिसम्पत्तिः च स्वयम् एव उपयोगिन्यौ न भवितुं शक्नुतः।

अनेकेभ्यः दशकेभ्यः भारते विशाल-जनसंख्या परिसम्पत्तेः अपेक्षया दायित्वरूपेण मन्यमाना अस्ति। परन्तु एतद् आवश्यकं नास्ति यत् कापि विशालजनसंख्या देशस्य कृते दायित्वम् एव भवेत्। मानव-परिसम्पत्तौ निवेशं कृत्वा इयम् उत्पादक-परिसम्पत्तिरूपेण परिवर्तयितुं शक्यते। यथा सर्वेषां कृते शिक्षा एवञ्च स्वास्थ्यम्, आधुनिक-प्रौद्योगिक्याः प्रयोगे औद्योगिक-कृषिश्रमिकाणां प्रशिक्षणम्, उपयोगिवैज्ञानिकम् अनुसन्धानम् इत्यादीनां कृते व्ययद्वारा।

निम्नलिखिते द्वे उदाहरणे स्पष्टं कुरुतः यत् जनाः अधिकोत्पादन-संसाधनं निर्मातुं प्रयासं कुर्वन्ति।

सकलस्य कथा

द्वे मित्रे विलासः सकलश्च एकस्मिन् एव ग्रामे सेमापुरे निवसतः स्म। सकलः द्वादशवर्षीयः आसीत्। तस्य माता शीला गृहस्य कार्यं पश्यति स्म। तस्य पिता बूटा चौधरी कृषिक्षेत्रे कार्यं करोति स्म। सकलः गृहस्य कार्येषु स्वस्य मातुः साहाय्यं करोति स्म। सः स्वानुजस्य जीतू इत्यस्य अपि च स्वीयभगिन्याः सीतू इत्यस्याः अपि साहाय्यं करोति स्म। तस्य पितृव्यः श्यामः दशम-परीक्षोत्तीर्णः आसीत् परञ्च सः गृहे व्यर्थः एव उपविष्टः आसीत् यतो हि सः अवृत्तिकः आसीत्। बूटा शीला च इच्छतः स्म यत् तयोः पुत्रः सकलः पठेत् इति। तयोः आग्रहः आसीत् यत् तत्पुत्रस्य विद्यालये नामाङ्कनं भवेत् इति। सः विद्यालये प्रवेशं प्राप्तवान्। सः अध्ययनम् आरब्धवान्। उच्चतर-माध्यमिकीय-परीक्षयोः सः उत्तीर्णः अभवत्। तस्य पिता तं शिक्षां निरन्तरं कर्तुं प्रासादयत्। तस्य पिता सकलस्य संगणकीय-व्यावसायिक-पाठ्यक्रमस्य अध्ययनार्थम् ऋणं स्वीकृतवान्। सकलः प्रतिभाशाली आसीत् तस्य च आरम्भतः एव अध्ययने रुचिः आसीत्। महता उत्साहेन लग्नेन च सः स्वीयं पाठ्यक्रमं पूर्णं कृतवान्। किञ्चित्कालानन्तरं सः कस्मिंश्चित् कृषि-क्षेत्रे उद्योगं लब्धवान्। तेन नूतनप्रकारकस्य कार्यक्रमस्य (सॉफ्टवेयर इत्यस्य) प्रारूपम् अपि सज्जीकृतम्। अनेन कार्यक्रमेण क्षेत्रस्य विक्रय-वर्धनाय साहाय्यं लब्धम्। तस्य अधिकारी तस्मिन् प्रसन्नः भूत्वा तं पदोन्नतं कृतवान्।

चित्रम् २.२ विलासस्य सकलस्य च कथा

विलासस्य कथा

विलासः एकादशवर्षीयः बालः आसीत् । एषः सकलस्य ग्रामे एव निवसति स्म । विलासस्य पिता महेशः एकः धीवरः आसीत् । यदा विलासः केवलं द्विवर्षीयः आसीत् तदा तस्य पिता मृत्युं प्राप्तः । तस्य माता मत्स्यान् विक्रीय स्वकुटुम्बस्य लालनं पालनं च कृतवती । सा भूस्वामिनः सरोवरात् मत्स्यान् क्रीणाति स्म निकटस्थ-विपणौ च विक्रीणीते स्म । सा मत्स्यान् विक्रीय एकस्मिन् दिने केवलं 20त:30 रूप्यकाणि एव अर्जयितुं पारयति स्म । विलासः ग्रन्थि-रोगी जातः । चिकित्सकस्य चिकित्सां कारयितुं तस्य मातुः पार्श्वे पर्याप्तं धनं न आसीत् । सः विद्यालयम् अपि गन्तुं न शक्तवान् । तस्य अध्ययने रुचिः न आसीत् । सः भोजनपाचने स्वमातुः साहाय्यं करोति स्म तथा च स्वस्य अनुजस्य मोहनस्य अपि संवीक्षणं करोति स्म । किञ्चित्-समयानन्तरं तस्य माता रुग्णा जाता । तस्याः परीक्षणाय कोऽपि न आसीत् । कुटुम्बे अपि तस्याः परीक्षणाय कोऽपि न आसीत् । विलासः अपि तस्मिन् एव ग्रामे मत्स्यान् विक्रेतुं बाध्यः जातः । स्वमाता इव सः अपि न्यूनम् एव अर्जयितुं पारयति स्म ।

आगच्छन्तु चर्चां कुर्याम

- किं भवन्तः उभयोः मित्रयोः मध्ये कमपि भेदं प्राप्नुवन्ति ? ते भेदाः के सन्ति ?

क्रियाविधिः

प्रतिवेशि-ग्रामम् अथवा घोष-वसतिं गच्छन्तु । यः विलासः अथवा सकलः इव परिस्थितीः सम्मुखीकुर्वन् स्यात् तादृशस्य स्वीय-समवयसः कस्यचित् बालकस्य बालिकायाः वा अध्ययनं कुर्वन्तु ।

एतयोः द्वयोः व्यक्त्योः अध्ययनेन वयं दृष्टवन्तः स्मः यत् सकलः विद्यालयं गच्छति स्म अपरतः विलासः विद्यालयं न गतवान् । सकलः शरीरेण हृष्टः पुष्टः स्वस्थः च आसीत् । चिकित्सकस्य पार्श्वे वारं वारं गन्तुं तस्य कृते आवश्यकता न आसीत् । विलासः ग्रन्थि-रोगी आसीत् । तस्य पार्श्वे चिकित्सक-सकाशं गन्तुं साधनानि न आसन् । सकलः संगणकविषये उपाधिं प्राप्तवान् आसीत् । सकलः कस्मिंश्चित् निजक्षेत्रे उद्योगं प्राप्तवान् । विलासः तदेव कार्यं कुर्वन् अवर्तत यत् कार्यं तस्य माता करोति स्म । स्वमाता इव कुटुम्बस्य लालन-पालनकृते तस्य आयः बहुन्यूनः आसीत् ।

सकलस्य प्रकरणे नैकवर्षाणां शिक्षा तदीय-श्रमे गुणवत्ताम् अवर्धयत् । अनेन तस्य सकलोत्पादकतायां वृद्धिः अभवत् । सकलोत्पादकता देशस्य संवृद्धौ योगदानं करोति । अस्य स्थाने व्यक्तिः वेतनरूपेण

अथवा स्वाभीष्टस्य केनचिद् अन्यरूपेण प्रतिफलं प्राप्नोति । विलासः स्वीयजीवनस्य आरम्भिक-काले कामपि शिक्षाम् अथवा स्वास्थ्यसेवां न प्राप्तुं शक्तवान् । स्वमाता इव सः मत्स्यान् विक्रीय स्वजीवन-यापनं करोति स्म । अत एव स्वमाता इव अकुशल-श्रमिकस्य वेतनम् एव प्राप्नोति स्म ।

मानव-संसाधने (शिक्षा-स्वास्थ्यसेवाद्वारा) निवेशं कृत्वा भाविकाले उच्च-प्रतिफलानि प्राप्तुं शक्यन्ते । जनेषु अयं निवेशः भूमौ एवञ्च परिसम्पत्तौ निवेशः इव अस्ति । व्यक्तिः शेयरमध्ये एवञ्च बाण्डस्-मध्ये निवेशान् भाविकाले उच्च-प्रतिफलस्य प्राप्तिः भविष्यति इति आशां मनसि निधाय करोति ।

कश्चन बालकः अपि यस्य शिक्षायां स्वास्थ्ये च निवेशः कृतः अस्ति, भविष्ये उच्चायरूपेण एवञ्च समाजाय बृहद्-योगदानरूपेण अधिकं प्रतिफलं दातुं शक्नोति । दृश्यते यत् शिक्षितौ माता-पितरौ स्वबालस्य शिक्षायाः कृते अधिकं निवेशं कुरुतः । यतो हि तौ स्वयम् अपि शिक्षायाः महत्त्वम् अनुभूतवन्तौ वर्तेते । तौ उचित-पोषणं स्वच्छतां च प्रति अपि सचेतसौ वर्तेते । तेन एव प्रकारेण शिक्षितौ माता-पितरौ निजबालानां विद्यालयीय-शिक्षायाः एवञ्च समीचीन-स्वास्थ्यस्य आवश्यकतानाम् अपि अवधानं कुरुतः । अनेन प्रकारेण अस्मिन् प्रकरणे एकं समीचीनं चक्रं निर्मितं जायते । एतद्-वैपरीत्येन अस्वच्छतायाम् एवञ्च सौविध्यरहित-स्थितिषु निवसन्तौ स्वयम् अपि अशिक्षितौ माता-पितरौ कस्यचित् अपि दुश्चक्रस्य सर्जनं कुरुतः । यथा स्वयं सौविध्य-वञ्चितौ वर्तेते तथैव स्वीयान् बालान् अपि सौविध्य-वञ्चितान् कुरुतः ।

जापान-सदृशैः देशैः मानव-संसाधनोपरि निवेशः कृतः अस्ति । तेषां पार्श्वे किमपि प्राकृतिकं संसाधनं न आसीत् । जापानं विकसितः धनी देशः अस्ति । जापानदेशीयाः

स्वदेशस्य कृते आवश्यक-प्राकृतिक-संसाधनानाम् आयातं कुर्वन्ति । ते विकसिताः अथवा धनिनः कथम् अभवन् ? ते जनानाम् उपरि विशेषतः शिक्षा-स्वास्थ्यक्षेत्रयोः निवेशं कृतवन्तः । ते भूमि-परिसम्पत्तिसदृशानाम् अन्य-संसाधनानां कुशलतया सह उपयोगं कृतवन्तः । एते जनाः यां कुशलताम् एवञ्च प्रौद्योगिकीं विकसितवन्तः तया एव एते जनाः धनिनः अथवा विकसिताः अभवन् ।

पुरुषाणां महिलानां च आर्थिक-क्रियाविधयः

विलासः एवञ्च सकलः इव जनाः विभिन्न-क्रियाविधिषु संलग्नाः सन्ति । वयं दृष्टवन्तः यत् विलासः मत्स्यान् विक्रीणीते स्म सकलः च कस्मिंश्चित् कृषि-क्षेत्रे उद्योगं प्राप्तवान् । विभिन्न-क्रियाविधयः प्राथमिक-द्वितीयक-तृतीयकेषु त्रिषु प्रमुख-क्षेत्रकेषु वर्गीकृताः सन्ति । प्राथमिक-क्षेत्रके कृषिः, वानिकी, पशुपालनम्, मत्स्यपालनम्, कुक्कुटपालनम्, खननम् उत्खननं च समाविष्टानि सन्ति । द्वितीयक-क्षेत्रके विनिर्माणं समाविष्टम् अस्ति । तृतीयक-क्षेत्रे व्यापारः, परिवहनम्, सञ्चारः, बैंकिंग्, बीमा, शिक्षा, स्वास्थ्यम्, पर्यटन-सेवाः च इत्यादीनि समाविष्टानि सन्ति । अस्मिन् क्षेत्रके गतिविधीनां परिणामतः वस्तूनां सेवानां च उत्पादनं भवति । एते गतिविधयः राष्ट्रिये आये मूल्य-वर्धनं कुर्वन्ति । एताः क्रियाः आर्थिक-क्रियाः कथ्यन्ते । आर्थिक-क्रियासु अथवा आपणिक-क्रियासु वेतनस्य अथवा लाभस्य उद्देश्येन कृतानां क्रियाणां कृते पारिश्रमिकं प्रदीयते । एतासु शासनिक-सेवाः समेत्य वस्तूनाम् अथवा सेवानाम् उत्पादनं समाविष्टम् अस्ति । आपणेतर-क्रियाणाम् अर्थः स्वोपभोगार्थम् उत्पादनम् अस्ति । एतासु क्रियासु

चित्रम् २.३ किं भवन्तः एतस्य चित्रस्य आधारेण क्रियाविधीनां त्रिषु क्षेत्रकेषु वर्गीकरणं कर्तुं शक्नुवन्ति ?

प्राथमिकोत्पादानाम् उपभोगः एवञ्च प्रसंस्करणं तथा च अचल-परिसम्पत्तीनां स्वलेखोत्पादनम् अन्तर्भवन्ति ।

गतिविधिः

निजनिवासस्य निकटे स्थितं कमपि ग्रामम् अथवा उपनगरं गच्छन्तु अथ च तत्रत्यैः जनैः क्रियमाणान् गतिविधीन् लिखन्तु ।

एतद् सम्भवं नास्ति चेत् स्वीयान् प्रतिवेशिनः पृच्छन्तु यत् तेषां व्यवसायः कः अस्ति ? तेषां कार्यं भवन्तः त्रिषु क्षेत्रकेषु कस्मिन् क्षेत्रके स्थापयिष्यन्ति ?

एते गतिविधयः आर्थिक-क्रियाः सन्ति अथवा आर्थिकेतर-क्रियाः सन्ति इति ज्ञापयन्तु ।

विलासः ग्रामस्य आपणे मत्स्यान् विक्रीणीते ।

विलासः स्वकुटुम्बस्य कृते भोजनं पाचयति ।

सकलः कस्मिंश्चिद् निजकृषिक्षेत्रे कार्यं करोति ।

सकलः स्वस्य अनुजभ्रातृ-भगिनीः संरक्षति ।

ऐतिहासिक-सांस्कृतिक-कारणात् कुटुम्बेषु पुरुष-महिलानां मध्ये श्रमस्य विभाजनं भवति । सामान्यतः महिलाः गृह-कार्याणि कुर्वन्ति पुरुषाः च क्षेत्रेषु कार्यं कुर्वन्ति । सकलस्य माता शीला भोजनं पाचयति, पात्राणि स्वच्छीकरोति, वस्त्राणि प्रक्षालयति एवञ्च निजबालकान् संरक्षति । सकलस्य पिता बूटाः कृषिक्षेत्रे कार्यं करोति, उत्पादान् आपणे विक्रीणीते एवञ्च कुटुम्बस्य कृते धनम् अर्जयति ।

शीला परिवारस्य पालन-पोषणार्थं याः सेवाः प्रददाति तदर्थं तस्याः कृते किमपि पारिश्रमिकं न प्रदीयते । बूटाः धनम् अर्जयति यद्धि सः कुटुम्बस्य पालन-पोषणार्थं व्ययीकरोति । कुटुम्ब-सेवायै महिलाः किमपि पारिश्रमिकं न प्राप्नुवन्ति । महिलानां सेवाः राष्ट्रियेण आयेन सह न योज्यन्ते ।

विलासस्य माता गीता मत्स्यान् विक्रीय आयं करोति स्म । अनेन प्रकारेण महिलानां कृते तासां सेवार्थं तदा धनं प्रदीयते यदा ताः श्रमापणे प्रवेशं कुर्वन्ति । पुरुष-सहयोगी इव महिलानाम् आयस्य निर्धारणं तदीय-शिक्षाम् एवञ्च कौशलम् आधारीकृत्य क्रियते । व्यक्तेः उपलब्धानाम् अवसराणां समीचीनतया उपयोग-करणे शिक्षा साहाय्यं करोति । शिक्षा कौशलं च आपणे कस्याश्चित् व्यक्तेः आयस्य प्रमुखौ निर्धारकौ स्तः । अधिकांश-महिलानां पार्श्वे बहुन्यून-शिक्षा एवञ्च निम्नकौशलस्तरः अस्ति । पुरुषाणाम् अपेक्षया महिलाभ्यः न्यूनं पारिश्रमिकं प्रदीयते । अधिकांश-महिलाः तत्र कार्यं कुर्वन्ति यत्र आजीविकायाः सुरक्षा न भवति तथा च अधिनियमस्य सुरक्षायाः अभावः भवति । अनियमित-वृत्तिः एवञ्च निम्नः आयः अस्य क्षेत्रकस्य विशेषतारूपेण स्तः । अस्मिन् क्षेत्रके प्रसूत्यवकाशः, शिशु-संरक्षणम् अन्यानि च सामाजिक-सुरक्षा-तन्त्रसदृशानि सौविध्यानि उपलब्धानि न भवन्ति । तथापि उच्चशिक्षया एवञ्च उच्चकौशलेन युक्ताः महिलाः पुरुषसमानं वेतनं प्राप्नुवन्ति । संघटित-क्षेत्रके शिक्षणं चिकित्सा च ताः बहु अधिकम् आकर्षयतः । काश्चन महिलाः सामान्य-वृत्तीः अतिरिच्य प्राशासनिक-सेवासु अन्य-सेवासु च प्रवेशं लब्धवत्यः सन्ति । एतासां सेवानां कृते वैज्ञानिक-प्रौद्योगिकसेवयोः उच्चस्तरस्य आवश्यकता भवति । स्वीयां भगिनीम् अथवा तया सह पठन्तीं कामपि सहपाठिनीं पृच्छन्तु यत् सा किं भवितुम् इच्छति ।

जनसंख्यायाः गुणवत्ता

जनसंख्यायाः गुणवत्ता साक्षरत-मितिं जीवन-प्रत्याशया निरूपित-व्यक्तीनां स्वास्थ्यम् एवञ्च देशस्य जनैः प्राप्तं कौशल-निर्माणम् आश्रयति । जनसंख्यायाः गुणवत्ता अन्ततः देशस्य समृद्धि-मितिं निर्धारयति । निरक्षरा अस्वस्था च जनसंख्या अर्थव्यवस्थायै भारभूता भवति । साक्षरा स्वस्था च जनसंख्या परिसम्पत्तिः भवति ।

शिक्षा

सकलः स्वजीवनस्य आरम्भिक-वर्षाणां शिक्षातः उत्तमाजीविकाम् आकर्षक-वेतनं च प्राप्तवान् । वयं दृष्टवन्तः यत् सकलस्य विकासाय शिक्षा एकं महत्त्वपूर्णम् आगतम् आसीत् । शिक्षाद्वारा तस्य कृते नूतनानि क्षितिजानि उद्घटितानि,

नूतनाः आकांक्षा प्राप्ताः एवञ्च जीवनस्य मूल्यानि

चित्रम् २.४ :विद्यालयस्य छात्रच्छात्राः

विकसितानि अभवन् । न केवलं सकलस्य कृते अपितु समाजस्य विकासाय अपि शिक्षायाः योगदानम् अस्ति । शिक्षा राष्ट्रस्य आये एवञ्च सांस्कृतिक-समृद्धौ अपि वृद्धिं करोति अपि च प्रशासनस्य कार्य-क्षमतां वर्धयति । प्राथमिक

> व्यक्तिः काचित् सकारात्मक-परिसम्पत्तिः एवञ्च मूल्यवत् राष्ट्रिय-संसाधनम् अस्ति यस्य बहुसहजतया गतिशीलतायाः एवञ्च अवधानेन सह सज्जीकरणस्य पोषणस्य तथा च विकसनस्य आवश्यकता अस्ति । प्रत्येकं व्यक्तेः विकासः नाम समस्यानाम् आवश्यकतानां काचित् शृङ्खला अस्ति । .....अस्यां जटिल-गतिशीलविकास-प्रक्रियायां शिक्षायाः उत्प्रेरकभूमिका अवधानेन सह सज्जीकरणीया एवञ्च बहुसंवेदनशीलतया सह कार्यान्विता करणीया इति ।

स्रोतः राष्ट्रीय-शिक्षा- नीतिः 1986



स्रोतः आर्थिकसर्वेक्षणम् २०१४-२०१५

शिक्षायां सार्वजनिक-व्याप्तेः, धारणस्य गुणवत्ता-प्रदानस्य च प्रावधानं कृतम् अस्ति । अस्मिन् प्रसङ्गे बालिकानां विषये विशेषम् अवधानं कृतम् अस्ति । प्रत्येकस्मिन् जनपदे नवोदय-विद्यालयसदृशाः प्रगति-निर्धारकाः विद्यालयाः स्थापिताः सन्ति । विशालसङ्ख्यायां हाईस्कूलविद्यार्थिभ्यः ज्ञान-कौशलसम्बन्धितं व्यवसायं सुलभायितुं व्यावसायिक-शाखाः विकसिताः सन्ति । शिक्षाकृते परिव्ययः प्रथम-पञ्चवार्षिक-योजनायाः 151कोटिरूप्यकराशितः वर्धित्वा एकादशपञ्चवार्षिक-योजनायां 3766.90कोटिरूप्यकमितः जातः । सकलगृहोत्पादस्य प्रतिशतरूपेण शिक्षाकृते व्ययः

आगच्छन्तु चर्चां कुर्याम

२.१ आरेखस्य अध्ययनं कृत्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि यच्छन्तु --

- किं १९५१तः जनसंख्यायाः साक्षरता-मितिः वर्धिता अस्ति ?
- कस्मिन् वर्षे भारते साक्षरता-मिति सर्वाधिका अवर्तत ?
- भारते पुरुषाणां साक्षरतामितिः अधिका किमर्थम् अस्ति ?
- पुरुषाणाम् अपेक्षया महिलाः न्यूनं शिक्षिताः किमर्थं सन्ति ?
- भवन्तः भारते जनानां साक्षरता-मितेः परिशीलनं कथं करिष्यन्ति ?

• २०२०तमे वर्षे भारतस्य साक्षरत-मितेः विषये भवतां पूर्वानुमानं किम् अस्ति ?

क्रियाविधिः

स्वविद्यालये अथवा स्वस्य प्रतिवेशि-सहशिक्षाविद्यालये पठतां बालक-बालिकानां गणनां कुर्वन्तु । स्वीयं विद्यालय-प्रशासकं कथयन्तु यत् सः भवतां कृते बालक-बालिकानां संख्याविषयक-विवरणानि उपलब्धानि कारयेत् । यदि तेषु कोऽपि भेदः अस्ति तर्हि तस्य अध्ययनं कुर्वन्तु कक्षायां च तस्य कारणं बोधयन्तु ।

1951-52तमाब्दस्य प्रतिशतं 0.64तः वर्धित्वा 2013-14तमाब्दे प्रतिशतम् 3.3मितः (संकल्पपत्रानुमानम्) जातः । अनेन साक्षरता-मितिः 1951तमाब्दस्य प्रतिशतम् 18तः वर्धित्वा 2011तमाब्दे प्रतिशतम् 74मिता अभवत् । शिक्षा व्यक्तीनां केवलम् अधिकारः एव नास्ति अपितु निजकर्तव्यानां समुचितरीत्या पालनार्थम् एवञ्च स्वाधिकाराणां समुचितरीत्या लाभस्वीकरणार्थम् आवश्यकी अपि अस्ति। तथापि जनसंख्यायाः विभिन्नभागेषु व्यापकः भेदः प्राप्यते। महिलानाम् अपेक्षया पुरुषाणां साक्षरता-मितिः प्रायः प्रतिशतं 16.6 मिताधिका अस्ति एवञ्च ग्रामीण-क्षेत्राणाम् अपेक्षया नगरीय-क्षेत्रेषु साक्षरता-मितिः प्रायः षोडशमिताधिका अस्ति ।

2011तमे वर्षे केरलस्य केषुचित् जनपदेषु साक्षरता-मितिः प्रतिशतं 94मिता अस्ति अपरतः बिहारे प्रतिशतं 62मिता एव अस्ति । भारतस्य पञ्चलक्षाधिक-ग्रामेषु प्राथमिक-विद्यालयीय-प्रणाली प्रसृता अस्ति । दुर्भाग्यवशात् विद्यालयीय-शिक्षायाः अयं स्तरः शिक्षायाः निम्नस्तरकारणात् एवञ्च मध्ये अध्ययन-परित्यागस्य उच्चमितिकारणात् दुर्बलः जातः । 6तः 14वर्षीयाः सर्वे विद्यालयीयाः बालकाः 2010तमवर्षं यावद् प्राथमिक-शिक्षां प्राप्नुयुः इति दिशायां सर्वशिक्षाभियानम् एकः महत्त्वपूर्णः पदक्षेपः अस्ति । प्राथमिक-शिक्षायाः सार्वभौमिक-लक्ष्यं प्राप्तुं राज्यानां स्थानीय-शासनानां तथा च समुदायानाम् अयं समयबद्धः समारम्भः अस्ति। अनेन सहैव प्राथमिक-शिक्षायां नामाङ्कन-वर्धनार्थं 'सेतु-पाठ्यक्रमः' अथ च 'विद्यालयं प्रति गच्छन्तु' इति शिबिराणां प्रारम्भः कृतः अस्ति । कक्ष्यासु बालानाम् उपस्थितेः वर्धनार्थम् एवञ्च बालानां धारण-स्थितेः पोषण-स्थितेः च संस्करणार्थं मध्याह्न-भोजन-योजनायाः क्रियान्वयनं क्रियमाणम् अस्ति । एताभिः नीतिभिः भारते शिक्षित-जनानां संख्यायां वृद्धिः भवितुं शक्नोति ।

एकादश-योजनायां योजनावधेः अन्तं यावद् उच्च-शिक्षायां 18तः 23वर्षीयाणां नामाङ्कने प्रतिशतं 15मिता वृद्धिः 2011-2012पर्यन्तं तथा च प्रतिशतं 21मिता वृद्धिः द्वादश-योजनापर्यन्तं करिष्यते इति प्रयासः कृतः अस्ति । इयं रणनीतिः व्याप्तौ वृद्धिम्, गुणवत्तां च, राज्यानां कृते विशेष-पाठ्यक्रमे परिवर्तनस्य स्वीकरणं तथा च व्यवसायीकरणम् एवञ्च सूचना-प्रौद्योगिक्याः उपयोग-जालस्य प्रसारणम् अभिलक्ष्य केन्द्रिता अस्ति । इयं योजना दूरस्थ-शिक्षायाः, औपचारिकशिक्षायाः, अनौपचारिक-शिक्षायाः, दूरस्थ-शिक्षायाः अथ च संचार-प्रौद्योगिक-शिक्षायाः शिक्षण-संस्थानानाम् अभिसरणम् अपि आश्रयति । गतपञ्चाशद्-वर्षेषु विशेष-क्षेत्रेषु उच्च-शिक्षा-दातृशिक्षण-संस्थानानां तथा च विश्वविद्यालयानां संख्यायां महत्त्वपूर्ण-वृद्धिः जाता । 1951तः 2011-2012 एवञ्च 2012-2013 इत्यनयोः मध्ये महाविद्यालयानां विश्वविद्यालयानां च संख्यायां वृद्धिं छात्राणां नामाङ्कनम् अध्यापकानां च नियुक्तिं 2.1 सारण्यां पश्यन्तु ।

सारणी २.१ उच्चशिक्षायाः संस्थानां संख्या, नामाङ्कनम् एवञ्च संकायाः

वर्षम्	महाविद्यालयानां संख्या	विश्वविद्यालयानां संख्या	विद्यार्थिनः	शिक्षकाः
१९५०-५१	७५०	३०	२६३०००	२४०००
१९९०-९१	७३४६	१७७	४९२५०००	२७२०००
१९९६-९७	९७०३	२१४	६७५५०००	३२१०००
१९९८-९९	११०८९	२३८	७४१७०००	३४२०००
२००७-०८	१८०६४	३७८	१४०००००	४९२०००
२०११-१२	३१३२४	६११		
२०१२-१३	३७२०४	७२३	२८५००००	

स्रोतः विश्वविद्यालयानुदानायोगस्य वार्षिकसमाख्या १९९६-९७ तथा च १९९८-९९ एवञ्च चिता शैक्षिक-सांख्यिकी, मानवसंसाधनविकास-मन्त्रालयः, उच्चशिक्षायाः प्रारूपसमाख्या, एकादशी पञ्चवार्षिकी योजना, वर्किंग ग्रुप् एकादशी पञ्चावर्षिकी योजना २०११-१२,२०१२-१३ ।

आगच्छन्तु चर्चां कुर्याम

2.1 सारणीम् अधिकृत्य कक्ष्यायां चर्चां कुर्वन्तु तथा च अधोलिखितानां प्रश्नानाम् उत्तराणि ददातु

- किं विद्यार्थिनां वर्धमानायाः संख्यायाः प्रवेशार्थं महाविद्यालयानां संख्या पर्याप्ता अस्ति ?
- किं भवन्तः चिन्तयन्ति यत् अस्माभिः विश्वविद्यालयानां संख्यायां वृद्धिः करणीया ?
- 1950-1951तः 1998-1999पर्यन्तं शिक्षकाणां संख्यायां कियती वृद्धिः अभवत् ?
- भाविमहाविद्यालय-विश्वविद्यालयानां विषये भवतां कः विचारः अस्ति ?

स्वास्थ्यम्

लाभः अधिकतमः भवेत् इति कृषिक्षेत्रस्य उद्देश्यम् अस्ति । किं भवन्तः चिन्तयन्ति यत् किमपि कृषिक्षेत्रं ये जनाः असमीचीन-स्वास्थ्यकारणात् स्वस्थ-श्रमिकाणां समानं कार्यं न कर्तुम् अशक्नुवन् तादृशेभ्यः जनेभ्यः आजीविकां प्रदातुं प्रेरिता भविष्यति ? कस्याश्चित् व्यक्तेः स्वास्थ्यं तस्यै स्वीय-क्षमतां प्राप्तुम् एवञ्च रोगान् विरुध्य सङ्घर्षं कर्तुं शक्तिं ददाति । अस्वस्थ-जनाः कस्यचित् संघटनस्य कृते भारभूताः भवन्ति।

ाः

वस्तुतः आत्मकल्याणं कर्तुं स्वास्थ्यम् एकः अपरिहार्यः आधारः अस्ति । अतः जनसंख्यायाः स्वास्थ्य-स्थितेः संस्करणं भवेत् इति कस्यचित् अपि देशस्य प्राथमिकता भवति । जनसंख्यायाः अल्पसौविध्ययुतानां वर्गाणां कृते विशेषम् अवधानं कृत्वा स्वास्थ्य-सेवासु परिवारकल्याणसेवासु एवञ्च पौष्टिक-सेवासु एषां व्याप्तिः समीचीनतरा भवेत् इति अस्माकं राष्ट्रिय-नीतेः अपि लक्ष्यम् अस्ति । विगतेषु पञ्चदशकेषु भारतेन शासनिक-शासनेतरक्षेत्रेषु प्राथमिक-द्वितीयक-तृतीयक-सेवानां कृते अपेक्षिता एका विस्तृत-स्वास्थ्य-आधारिकसंरचनायाः जनशक्तेः च निर्माणं कृतम् अस्ति।

एषाम् उपायानाम् अङ्गीकरणेन जीवन-प्रत्याशा समेध्य 2011तमे वर्षे 66वर्षाधिका जाता । शिशु-मृत्युमितिः 1951तमवर्षस्य 147तः व्यवकलिता भूत्वा 2012तमे वर्षे 40मिता अभवत् । अस्मिन् अवधौ अशोधित-जन्ममितिः अपचिता भूत्वा 22.1मिता अभवत् मृत्यु-मितिः च 7मिता जाता । जीवन-प्रत्याशायां वृद्धिः एवञ्च शिशु-संरक्षणस्य संस्करणं देशस्य आत्मविश्वासं भावि-प्रगत्या सह तोलयितुम् उपयोगिनौ स्तः । आयुषि वृद्धिः आत्मविश्वासेन सह जीवनस्य उत्तमगुणवत्तायाः सूचिका अस्ति । शिशूनां संक्रमणात् रक्षया, मातृभिः सह बालानां संरक्षणेन एवञ्च पोषणस्य सुनिश्चयीकरणेन शिशु-मृत्युमितिः न्यूनीभवति ।

स्रोतः राष्ट्रीयस्वास्थ्यपञ्जिका 2010, आर्थिकसर्वेक्षणम् 2013-14

आगच्छन्तु चर्चां कुर्याम

2.2 सारणीं पठन्तु अधोलिखितप्रश्नानां च उत्तराणि ददतु -

- 1951तः 2011पर्यन्तम् औषधालयानां संख्यायां प्रतिशतं कियती वृद्धिः अभवत् ?
- 1951तः 2011पर्यन्तं चिकित्सकानां चिकित्साकर्मिणां च प्रतिशतं कियती वृद्धिः अभवत् ?

*शिशु-मृत्यु-मित्या अभिप्रायः एकवर्षन्यूनायुष्मतां शिशूनां मृत्युना अस्ति ।

**जन्म-मित्या अभिप्रायः कस्मिंश्चिद् विशेषावधौ प्रतिसहस्रं व्यक्तीनां पृष्ठे जन्म गृहीतवतां शिशूनां संख्यया अस्ति ।

***मृत्यु-मित्या अभिप्रायः कस्मिंश्चिद् विशेषावधौ प्रतिसहस्रं व्यक्तीनां पृष्ठे मृतानां जनानां संख्यया अस्ति ।

सारणी 2.2, सम्बन्धितवर्षाणां स्वास्थ्य-आधारिकसंरचना

	1951	1981	2001	2010	2013
H उपकेन्द्रम्/प्राथमिकस्वास्थ्यकेन्द्रम्/ सामुदायिक-स्वास्थ्यकेन्द्रम्	725	57,361	1,63,181	1,75,277	1,81,319
औषधालयः चिकित्सालयः च	9,209	23,555	43,322	28,472	19,817 (केवलं चिकित्सालयाः)
शय्या	1,17,198	5,69,495	8,70,161	5,76,793	6,28,000
चिकित्सकः (ऐलोपेथी)	61,800	2,68,700	5,03,900	8,16,629	9,18,000
परिचारिका	18,054	1,43,887	7,37,000	1,702,555	1,09,224 (सामान्यापरिचारिकाः)

स्रोतः राष्ट्रियस्वास्थ्यप्रोफाइल् २०१०, **D/o** आयुषः, स्वास्थ्यपरिवारकल्याणविभागः राष्ट्रियस्वास्थ्यप्रोफाइल् २०१३

- किं भवन्तः मन्यन्ते यत् चिकित्सकानां परिचारिकाणां च संख्यायां वृद्धिः पर्याप्ता अस्ति ? यदि न तर्हि किमर्थम् ?
- कस्मिंश्चित् चिकित्सालये अन्यानि कानि सौविध्यानि उपलब्धानि स्युः यानि भवन्तः इच्छन्ति ?
- भवन्तः सद्य एव यं चिकित्सालयं गतवन्तः तम् अधिकृत्य चर्चां कुर्वन्तु ।
- एतस्याः सारण्याः प्रयोगं कुर्वन्तः भवन्तः कस्यचित् आरेखस्य निर्माणं कर्तुं शक्नुवन्ति वा ?

क्रियाविधिः

भवन्तः निकटवर्तिनं कमपि शासनिकं शासनेतरं वा चिकित्सालयं गच्छन्तु निम्नलिखित-विवरणं च लिखन्तु - यं चिकित्सालयं भवन्तः गतवन्तः तस्मिन् चिकित्सालये कति शय्याः सन्ति ? चिकित्सालये कति चिकित्सकाः सन्ति ? चिकित्सालये कति परिचारिकाः कार्यं कुर्वत्यः सन्ति ? एतदतिरिच्य निम्नलिखिताः अतिरिक्त-सूचनाः एकत्रीकर्तुं प्रयासं कुर्वन्तु भवतां क्षेत्रे कति चिकित्सालयाः सन्ति ?
भवतां क्षेत्रे कति औषधालयाः सन्ति ?

भारते एतादृशानि अनेकानि स्थलानि सन्ति येषु इमानि मौलिक-सौविध्यानि अपि न सन्ति । भारते आहत्य ३८१चिकित्सामहाविद्यालयाः ३०१ दन्तचिकित्सामहाविद्यालयाः सन्ति । केवलं चतुर्षु राज्येषु आन्ध्रप्रदेश-कर्णाटक-महाराष्ट्रतमिलनाडुषु सर्वराज्येभ्यः अधिकाः चिकित्सामहाविद्यालयाः सन्ति ।

अवृत्तिः

सकलस्य माता शीला स्वीयगृह-कार्याणि बालानां संरक्षणं कृषि-कार्ये च स्वपत्युः बूटा इत्यस्य साहाय्यं करोति स्म । सकलस्य भ्राता जीतूः भगिनी च सीतूः स्वीयं समयं क्रीडनेन भ्रमणेन च यापयतः स्म । शीला जीतूः सीतूः वा अवृत्तिकाः सन्ति इति भवन्तः वक्तुं शक्नुवन्ति वा ? यदि न तर्हि किमर्थम् ?

अवृत्तिः तस्मिन् समये विद्यमाना उच्यते यदा प्रवर्तमान-पारिश्रमिकस्य मित्या कार्यं कर्तुम् इच्छुकाः जनाः वृत्तिं प्राप्तुं समर्थाः न भवन्ति । शीला गृहस्य बहिः कार्यं कर्तुं रुचिमती नास्ति । जीतूः सीतूः च स्वल्पवयस्कौ स्तः एवञ्च तयोः गणना श्रमशक्तेः जनसंख्यायां न भवितुं शक्नोति नैव च जीतूः सीतूः शीला च अवृत्तिकाः सन्ति इति कथयितुं शक्यते । श्रमबल-जनसंख्यायां तेषां जनानां समावेशः क्रियते येषाम् आयुः पञ्चदशतः आरभ्य एकोनषष्टितमवर्षं यावत् भवति । सकलस्य भ्राता भगिनी च एतदायुर्वर्गीयौ न स्तः । अतः तौ अवृत्तिकौ स्तः इति न कथयितुं

शक्यते । सकलस्य माता शीला कुटुम्बस्य कृते कार्यं करोति । स्वगृहात् बहिः गत्वा पारिश्रमिकार्थं कार्यं कर्तुं तस्याः इच्छा नास्ति। तस्याः कृते अपि न कथयितुं शक्यते यत् सा अवृत्तिका अस्ति । सकलस्य पितामहः पितामही मातामहः मातामही च अस्यां कथायां वर्णिताः न सन्ति । एते अपि अवृत्तिकाः सन्ति इति न कथयितुं शक्यते ।

भारतस्य सन्दर्भे ग्रामीण-नगरीयक्षेत्रेषु अवृत्तिः अस्ति । तथापि ग्रामीण-नगरीयक्षेत्रयोः अवृत्तेः प्रकृतिः भिन्ना अस्ति । ग्रामीण-क्षेत्रेषु **ऋतुकालिकी** एवञ्च **प्रच्छन्ना अवृत्तिः** अस्ति। नगरीयक्षेत्रेषु अधिकांशतः **शिक्षिता अवृत्तिः** अस्ति ।

ऋतुकालिकी अवृत्तिः तदा भवति यदा जनाः वर्षस्य केषुचित् मासेषु वृत्तिं प्राप्तुम् असमर्थाः भवन्ति । कृषिम् आश्रिताः जनाः सामान्यतः एतादृशीः समस्याः सम्मुखीकुर्वन्ति । वर्षे केचन मासाः व्यस्ताः भवन्ति यदा वपनं स्वच्छीकरणं गाहनं च क्रियते। केषुचित् विशेषमासेषु कृषिम् आश्रिताः जनाः अधिकं कार्यं न प्राप्नुवन्ति ।

प्रच्छन्नायाम् अवृत्तौ जनाः नियोजिताः प्रतीयन्ते, तेषां पार्श्वे भूखण्डः भवति । अस्मिन् भूखण्डे ते जनाः कार्यं प्राप्नुवन्ति । एवं प्रायः कृषिगत-कार्येषु रतैः परिजनैः सह भवति । कस्यचित् कार्यस्य कृते पञ्च जनाः आवश्यकाः भवन्ति परन्तु तस्मिन् कार्ये अष्टौ जनाः नियोजिताः भवन्ति । एतेषु अष्टसु जनेषु त्रयः जनाः अतिरिक्ताः सन्ति । एते त्रयः जनाः तस्मिन् एव क्षेत्रे कार्यं कुर्वन्ति यस्मिन् क्षेत्रे पञ्च जनाः कार्यं कुर्वन्ति । एतैः त्रीभिः जनैः कृतेन अंशदानेन पञ्चभिः जनैः कृते योगदाने कापि वृद्धिः न भवति । यदि एते त्रयः जनाः दूरीक्रियन्ते तर्हि क्षेत्रस्य उत्पादकतायां कापि न्यूनता न भविष्यति । क्षेत्रे पञ्चजनानां कार्यस्य आवश्यकता अस्ति एवञ्च त्रयः जनाः प्रच्छन्नरूपेण अवृत्तिकाः सन्ति ।

नगरीयक्षेत्राणां सन्दर्भे शिक्षिता अवृत्तिः एका सामान्य-परिघटना जाता अस्ति । दशम-स्नातक-स्नातकोत्तरोपाधि-धारिणः अनेके युवानः वृत्तिं प्राप्तुम् असमर्थाः सन्ति । केनचिद् अध्ययनेन तथ्यम् इदं दृष्टिपथम् आगतम् अस्ति यत् दशमापेक्षया स्नातक-स्नातकोत्तरयूनां मध्ये अवृत्तिः अधिकतीव्रगत्या वर्धिता अस्ति । कासुचित् विशेषश्रेणिषु जनशक्तेः आधिक्येन सहैव कासुचित् अन्यासु श्रेणिषु जनशक्तेः न्यूनता विद्यमाना अस्ति इति एका विरोधाभासिनी जनशक्ति-स्थितिः दृष्टिपथम् आगता अस्ति । एकतः कौशलार्हतासम्पन्नाः जनाः अवृत्तिकाः सन्ति अपरतः आर्थिक-संवृद्ध्यर्थम् आवश्यक-प्रौद्योगिक-कौशलानां न्यूनता अपि अस्ति ।

अवृत्तेः कारणात् जनशक्ति-संसाधनस्य विनाशः भवति । ये जनाः अर्थव्यवस्थायाः कृते परिसम्पत्तिरूपेण भवन्ति ते अवृत्तिकारणात् दायित्वेन परिवर्तन्ते । युवानः निराशाः हताशाः च भवन्ति । जनानां पार्श्वे स्वकुटुम्बस्य भरण-पोषणार्थं पर्याप्त-मुद्रा न भवति । यदि कार्यं कर्तुम् इच्छुकाः शिक्षित-जनाः वृत्तिं प्राप्तुम् असमर्थाः भवन्ति तर्हि तैः सह अयं महान् सामाजिकः अपव्ययः अस्ति ।

अवृत्ति-कारणात् आर्थिक-भारः वर्धते । अवृत्तिक-जनानां कार्यरत-जनसंख्योपरि आश्रयः वर्धते । कस्याश्चित् व्यक्तेः सममेव समाजस्य जीवन-गुणवत्ता दुष्प्रभाविता जायते । यदा केनचित् कुटुम्बेन केवलं जीवन-निर्वाह-स्तरः यापनीयः भवति तदा तस्य स्वास्थ्य-स्तरे एका सामान्या अपचितिः जायते अपि च विद्यालयीय-प्रणालीतः पृथक्त्वे वृद्धिः भवति ।

अतः कस्याश्चित् अर्थव्यवस्थायाः समग्र-विकासोपरि अवृत्तिकारणात् अहितकर-प्रभावः जायते । अवृत्तौ वृद्धिः मन्दिग्रस्तार्थव्यवस्थायाः सूचिका अस्ति । अनेन तेषां संसाधनानां विनाशः अपि जायते येषां उपयोगिरीत्या नियोजनं कर्तुं शक्यते स्म । यदि जनानां प्रयोगः संसाधनरूपेण न भवति तर्हि ते जनाः स्वाभाविकरूपेण अर्थव्यवस्थायाः कृते दायित्वानि भविष्यन्ति ।

सांख्यिकीयरूपेण भारते अवृत्तेः मितिः निम्ना अस्ति । तादृशानां जनानां विशालसंख्या अस्ति येषाम् आयः निम्नः उत्पादकता च निम्ना अस्ति पुनश्च येषां गणना नियोजित-जनानां मध्ये क्रियते । ते आवर्षं कार्यं कुर्वन्तः प्रतीयन्ते परन्तु तेषां क्षमतायाः आयस्य च अनुसारम् एतत् तेषां कृते पर्याप्तं नास्ति । ते कार्याणि तु कुर्वन्तः सन्ति परन्तु एवं प्रतीयते यत् एतानि कार्याणि तेषु बलात् स्थापिताः सन्ति । अतः ते निजमनोऽभीष्टं किमपि अन्यत् कार्यं कदाचित् कर्तुं शक्नुवन्ति । निर्धनजनाः कदापि व्यर्थं न स्थातुं शक्नुवन्ति । ते केनापि कार्येण सह आत्मानं योजयितुम् इच्छन्ति । कामं तस्मात् कार्यात् कोऽपि आयः भवेत् । स्वस्य अनेन आयेन ते काठिन्येन जीवन-निर्वाहं कर्तुं समर्थाः भवन्ति ।

एतदतिरिक्तं प्राथमिक-क्षेत्रके स्ववृत्तिः काचित् विशेषता अस्ति। यद्यपि एतादृशानां जनानाम् आवश्यकता न भवति तथापि सम्पूर्णः

चित्रम् २.६ किं भवन्तः स्मरन्ति यत् यदा भवन्तः उपानहाम् अथवा पादत्राणानां समीकरणं कारितवन्तः आसन् तदा कियत् मूल्यदानं कृतम् आसीत् ?

कुटुम्बः क्षेत्रेषु कार्यं करोति। अनेन प्रकारेण कृषि-क्षेत्रके प्रच्छन्ना अवृत्तिः भवति। परन्तु यदपि उत्पादनं भवति तस्मिन् उत्पादने सम्पूर्ण-कुटुम्बस्य भागः भवति। क्षेत्र-कार्येषु सहभागितायाः एवञ्च उत्पादित-सस्येषु भागस्य अवधारणा ग्रामीण-क्षेत्रेषु अवृत्तेः काठिन्यानि न्यूनीकरोति। परन्तु अनेन कुटुम्बस्य निर्धनता न्यूना न भवति एवञ्च प्रत्येकस्मात् कुटुम्बात् अधिशेष-श्रमिकाः वृत्तिम् अन्वेष्टुं ग्रामेभ्यः नगराणि प्रति प्रवासं कुर्वन्ति।

आगच्छन्तु, उपर्युक्तेषु त्रिषु क्षेत्रकेषु वृत्तेः परिदृश्यम् अवलम्ब्य परिचर्चां कुर्याम। कृषेः सर्वाधिकम् अवशोषण-कर्तृ अर्थव्यवस्थायाः क्षेत्रकं कृषिः अस्ति। गतवर्षेषु पूर्वचर्चितायाः प्रच्छन्नावृत्तेः कारणात् कृषौ जनसंख्यायाः आश्रयः न्यूनः जातः अस्ति। कृषिगतस्य अधिशेष-श्रमस्य कश्चन भागः द्वितीयक-क्षेत्रकं तृतीयक-क्षेत्रकं वा गतः अस्ति। द्वितीयक-क्षेत्रके लघुस्तरे क्रियमाणे विनिर्माणे श्रमस्य सर्वाधिकम् अभिशोषणम् अस्ति। तृतीयक-क्षेत्रके जैवप्रौद्योगिकी सूचना-प्रौद्योगिकी इत्यादयः विभिन्नाः नूतन-सेवाः दृश्यमानाः सन्ति।

आगच्छन्तु, जनाः स्वीय-ग्रामस्य अर्थव्यवस्थायाः कृते कथं परिसम्पत्तयः भवन्ति इति ज्ञातुम् एकां कथां पठाम।

कस्यचित् ग्रामस्य कथा

कश्चन ग्रामः आसीत्। अस्मिन् ग्रामे अनेके कुटुम्बाः निवसन्ति स्म। प्रत्येकं कुटुम्बः तावद् उत्पादनं करोति स्म यावता उत्पादनेन तस्य सदस्यानाम् आहारपूर्तिः भवितुं शक्नोति स्म। कुटुम्ब-सदस्याः स्वीय-वस्त्राणि वयन्ति स्म, स्वीयान् बालान् पाठयन्ति स्म। अनेन प्रकारेण प्रत्येकं कुटुम्बः स्वस्य आवश्यकताः स्वयमेव पूरयति स्म। एतेषु कुटुम्बेषु कश्चन कुटुम्बः स्वीयं पुत्रं कृषिमहाविद्यालयं प्रेषयितुं निर्णयम् अकरोत्। बालकः निकटस्थे एकस्मिन् कृषिमहाविद्यालये प्रवेशं लब्धवान्। कतिपयकालानन्तरं सः कृष्यभियान्त्रिकी-विषये योग्यतां प्राप्य ग्रामं प्रत्यागतः। सः एतावान् सर्जनशीलः सिद्धः अभवत् यत् तेन उन्नत-कोटि-हलयन्त्रस्य प्रारूपं सज्जीकृतम्। तेन गोधूमस्य उत्पादने वृद्धिः संजाता। अनेन प्रकारेण ग्रामे कृष्यभियान्त्रिक्याः रूपेण एकनूतनकार्यस्य सर्जनम् अभवत्। तत्र एव तस्य पूर्तिः अभवत्। ग्रामस्य तेन कुटुम्बेन स्वीयम् अधिशेष-सस्यं निकटस्थे ग्रामे विक्रीतम्। अनेन सस्येन तस्मै कुटुम्बाय बहुलाभः अभवत्। तस्य लाभस्य कुटुम्बसदस्याः परस्परं वितरणं कृतवन्तः। अनया सफलतया प्रेरिताः भूत्वा कतिपयकालानन्तरं ग्रामस्य सर्वे कुटुम्बाः एकम् उपवेशनं कृतवन्तः। तेषां बालानाम् अपि समीचीनतरं भविष्यं भवेद् इति तेषाम् इच्छा आसीत्। ग्रामे एकं विद्यालयम् उद्घाटयितुं ते पञ्चायतं प्रार्थितवन्तः। ते सर्वे स्वीयान् बालान् विद्यालयं प्रेषयिष्यन्ति इति तैः पञ्चायते विश्वासः उत्पादितः। पञ्चायतद्वारा शासन-साहाय्येन एकः विद्यालयः उद्घाटितः। निकटस्थात् नगरात् एकस्य शिक्षकस्य नियुक्तिः कृता। अस्य ग्रामस्य सर्वे बालकाः विद्यालयं गन्तुम् आरब्धवन्तः। कतिपयकालानन्तरं ग्रामस्य केनचित् कुटुम्बेन स्वीयपुत्रीं सीवनस्य प्रशिक्षणं कारितम्। अधुना सा ग्रामस्य सर्वेषां जनानां कृते वस्त्राणि सेवितुम् आरब्धवती यतो हि अधुना सर्वे जनाः उचितरीत्या स्यूतानि वस्त्राणि धर्तुम् इच्छन्ति स्म। अनेन प्रकारेण सौचिकस्य एकं नूतनं कार्यं सृजितम् अभवत्। एतस्य एकः अन्यः विधिपरकः प्रभावः जातः यत् कृषकाः वस्त्राणां क्रयणार्थं दूरं गम्यते स्म अतः दूरं गन्तुं यः समयः लगति स्म, सः समयः अधुना रक्षितः।

कृषकैः अधिकसमयः क्षेत्रेषु यापयितुम् आरब्धः अतः उत्पादनं वर्धितम् । एतत् समृद्धेः प्रारम्भः आसीत् । कृषकाणां पार्श्वे उपभोगात् अधिकानि वस्तूनि आसन् । अधुना ते स्वीयान् उत्पादान् तेभ्यः जनेभ्यः विक्रेतुं शक्नुवन्ति स्म ये तेषां ग्रामस्य आपणम् आगच्छन्ति स्म । समयेन सह सः ग्रामः, यत्र प्रारम्भे

कस्यचित् नूतनकार्यस्य औपचारिकरूपेण कोऽपि अवसरः न आसीत्, अधुना शिक्षकैः सौचिकैः कृष्यभिन्तृभिः एवञ्च अन्यप्रकारकैः जनैः परिपूर्णः जातः । इयं कथा केनचित् सामान्य-ग्रामेण सम्बद्धा आसीत् यत्र मानव-परिसम्पत्तेः उदीयमानेन स्तरेण जटिलानाम् आधुनिकार्थिक-क्रियाविधीनां च स्थलरूपेण तस्य विकासः कृतः ।

सारांशः

जनाः अर्थव्यवस्थायाः कृते परिसम्पत्तिरूपेण भवेयुः इत्येतदर्थं शिक्षायाः स्वास्थ्यस्य च आगताः केन प्रकारेण जनानां साहाय्यं कुर्वन्ति इति भवन्तः दृष्टवन्तः । अस्मिन् अध्याये अर्थव्यवस्थायाः त्रिषु क्षेत्रेषु जायमानानाम् आर्थिक-क्रियाणां विषये चर्चा कृता अस्ति । वयम् अवृत्ति-सम्बद्धानां समस्यानां विषये अपि पठितवन्तः । अन्ततः अयम् अध्यायः तस्य कस्यचित् ग्रामस्य कथया सह समाप्तः भवति । यस्मिन् ग्रामे पूर्वं कापि वृत्तिः न आसीत् परन्तु अनन्तरं तत्र वृत्तेः अनेके अवसराः उत्पन्नाः ।

अभ्यासः

1. संसाधनरूपेण जनाः इत्यनेन भवन्तः किम् अवगच्छन्ति ?
2. मानव-संसाधनं भूमि-भौतिकपरिसम्पत्तिसदृशेभ्यः अन्येभ्यः संसाधनेभ्यः केन प्रकारेण भिन्नम् अस्ति ?
3. मानव-परिसम्पत्ति-निर्माणे शिक्षायाः का भूमिका अस्ति ?
4. मानव-परिसम्पत्ति-निर्माणे स्वास्थ्यस्य का भूमिका अस्ति ?
5. कस्याश्चित् व्यक्तेः सफलजीवने स्वास्थ्यस्य का भूमिका अस्ति ?
6. प्राथमिक-द्वितीयक-तृतीयकक्षेत्रेषु कीदृश्यः विभिन्नाः आर्थिक-क्रियाः सञ्चाल्यन्ते ?
7. आर्थिकार्थिकभिन्न-क्रियाणां मध्ये कः भेदः अस्ति ?
8. महिलानां नियोजनं निम्नवेतन-कार्येषु किमर्थं क्रियते ?
9. अवृत्तिः (बेरोजगारी) इति शब्दस्य व्याख्यानं भवन्तः केन प्रकारेण करिष्यन्ति ?
10. प्रच्छन्नावृत्तेः ऋतुकालिकावृत्तेः च मध्ये कः भेदः अस्ति ?
11. शिक्षिताः अवृत्तिः भारतस्य कृते एका विशेष-समस्या किमर्थम् अस्ति ?
12. भवतां मतानुसारं भारतं कस्मिन् क्षेत्रके वृत्तेः सर्वाधिकान् अवसरान् निर्मातुं शक्नोति ?
13. किं भवन्तः शिक्षा-प्रणाल्यां शिक्षितावृत्तेः समस्यां दूरीकर्तुं कांश्चन उपायान् बोधयितुं शक्नुवन्ति ?
14. किं भवन्तः एतादृशानां ग्रामाणां कल्पनां कर्तुं शक्नुवन्ति यत्र पूर्वं वृत्तेः कोऽपि अवसरः न आसीत् परन्तु अनन्तरं प्रचुरतया जातः ?
15. भूमि-श्रम-भौतिकपरिसम्पत्ति-मानवपरिसम्पत्तिषु का परिसम्पत्तिः श्रेष्ठा अस्ति ? किमर्थम् ?

सन्दर्भाः

आर्थिक-सर्वेक्षणम् २००४-०५,वित्तमन्त्रालयः , भारतशासनम्, नवदेहली।

दशमपञ्चवार्षिकी योजना२००२-०७ इत्यस्याः मध्यावधि-मूल्याङ्कनम्, द्वितीयः भागः, योजनायोगः, नवदेहली।

दशमपञ्चवार्षिकी योजना२००२-०७, योजनायोगः, नवदेहली।

भारत-दर्शनम् २०२०, प्रतिवेदनम्, योजनायोगः, भारतशासनम्, नवदेहली।

गैरीः, एस्. बेकरः, १९६६, ह्यूमन –कैपीटल : ए थ्योरिटिकल एण्ड एम्पिरिकल एनालिसिस विद स्पेशल रेफरेंस टू एजूकेशन, सामान्यशृङ्खला संख्या८०, नेशनल ब्यूरो ऑफ इकनामिक रिसर्च, न्यूयार्कः।
थ्योडोर, डब्ल्यू. शुल्टज, इंवैस्टमेण्ट इन ह्यूमन कैपीटल, अमेरिकन इकनॉमिक रिव्यू, मार्चमासः १९६१।

3
अध्यायः

निर्धनता एकं समाह्वानम्

अवलोकनम्

अस्मिन् अध्याये निर्धनतायाः विषये चर्चा कृता अस्ति। निर्धनता स्वतन्त्र-भारतस्य पुरतः सर्वाधिकं कठिनं समाह्वानम् अस्ति। उदाहरण-द्वारा एतस्याः बह्वायामि-समस्यायाः विषये चर्चा कृता अस्ति। ततः अनन्तरम् अस्मिन् अध्याये सामाजिक-विज्ञानेषु निर्धनतां प्रति दृष्टिम् अवलम्ब्य अपि चर्चा कृता अस्ति। भारते विश्वे च निर्धनतायाः प्रवृत्तयः निर्धनता-रेखायाः अवधारणायाः माध्यमेन बोधिताः सन्ति। निर्धनतायाः कारणानाम् अथ च शासनेन कृतानां निर्धनता-निवारणोपायानां विषये अपि चर्चा कृता अस्ति। निर्धनतायाः आधिकारिक्याः अवधारणायाः मानव-निर्धनतां यावद् विस्तारं कृत्वा अध्यायस्य समाप्तिः कृता अस्ति।

परिचयः

स्वीयदैनिक-जीवने अस्माकं सम्पर्कः अनेकैः एतादृशैः जनैः सह भवति येषां विषये वयं चिन्तयामः यत् ते निर्धनाः सन्ति। ते ग्रामस्य भूमिहीनाः श्रमिकाः अपि भवितुं शक्नुवन्ति सममेव नगराणां जनसम्मर्दैः युक्तेषु घोषेषु निवसन्तः जनाः अपि भवितुं शक्नुवन्ति। ते निर्माण-स्थलानां दैनिक-वेतनभोगिनः श्रमिकाः अपि भवितुं शक्नुवन्ति सममेव भोजनालयेषु कार्यं कुर्वन्तः बालश्रमिकाः अपि भवितुं शक्नुवन्ति। ते विदीर्ण-वस्त्राः बालकहस्ताः भिक्षुकाः अपि भवितुं शक्नुवन्ति। वयम् आत्मानं परितः निर्धनतां पश्यामः। वस्तुतः देशे प्रतिव्यक्ति चतुर्थः जनः निर्धनः अस्ति। अस्य अयम् अर्थः अस्ति यत् २०११-१२तमे वर्षे भारते स्थूलरूपेण २७०मिलियनसंख्याकाः अथवा २७कोटिसंख्याकाः जनाः निर्धनतायां जीवन्ति स्म। अस्य अयम् अपि अर्थः अस्ति यत् विश्वे भारतदेशे सर्वाधिक-निर्धनानां संकेन्द्रणम् अस्ति। अनेन अस्य आह्वानस्य गम्भीरता परिलक्षिता भवति।

निर्धनतायाः द्वे विशिष्टे स्थिती

नगरीय-निर्धनता

३३वर्षीयः रामसरणः झारखण्डे राञ्च्याः निकटे गोधूमचूर्णस्य शिल्पशालायां दैनिक-वेतनभोगि-श्रमिकरूपेण कार्यं करोति। यदापि सः उद्योगं लभते तदा सः एकस्मिन् मासे प्रायः १५०० रूप्यकाणि अर्जयति। एतद् षट्सदस्य-कुटुम्बस्य कृते भरण-पोषणार्थं पर्याप्तं नास्ति। अस्मिन् कुटुम्बे तस्य पत्नीं समेत्य ६तः१२वर्षीयाः चत्वारः बालाः सम्मिलिताः सन्ति।

चित्रम् ३.१ रामसरणस्य कथा

तेन रामगढस्य समीपे स्थिते ग्रामे निवसतोः स्वीयवृद्धमाता-पित्रोः कृते अपि धनं प्रेषणीयं भवति । तस्य भूमिहीनः श्रमिक-पिता स्वजीवन-निर्वाहार्थं रामसरणम् अथ च हजारीबागे निवसन्तं तदीय-भ्रातारम् आश्रयति। रामसरणः नगरस्य बाह्यक्षेत्रे स्थितायां जनसम्मर्दयुक्तायां वसत्यां भाटकेन एकप्रकोष्ठ-गृहे निवसति । एतद् इष्टिका-मृत्तिकानिर्मितम् एकं कुटिरम् अस्ति। तस्य पत्नी सन्तादेवी केषुचिद् गृहेषु अंशकालिक-सेविकारूपेण कार्यं करोति तथा च ८००रूप्यकाणि अर्जयति । तौ दिवसेन द्विवारं द्विदलौदनस्य स्वल्पभोजनस्य व्यवस्थां कर्तुं सफलीभवतः परन्तु एतद् भोजनं तेषां कृते कदापि पर्याप्तं न भवति। तस्य ज्येष्ठपुत्रः कौटुम्बिकम् आयं वर्धयितुम् एकस्मिन् चायापणे सहायकरूपेण कार्यं कृत्वा ३००रूप्यकाणि इतोऽपि अर्जयति। तस्य दशवर्षीया पुत्री लघुबालकानां संरक्षणं करोति । कोऽपि बालकः विद्यालयं न गच्छति। तेषु एकैकस्य पार्श्वे विदीर्णं पुरातनं च वस्त्रयुगलद्वयम् एव अस्ति । नूतनवस्त्राणि तदैव क्रीयन्ते यदा पुरातनवस्त्राणि धर्तुं योग्यानि न वर्तन्ते। उपानह-धारणं नाम विलासिता अस्ति। लघुबालकाः अपोषिताः तिष्ठन्ति। यदा ते रुग्णाः भवन्ति तदा ते चिकित्सायाः किमपि सौविध्यं न लभन्ते।

ग्रामीण-निर्धनता

लख्खासिंहः उत्तर-प्रदेशे मेरठसमीपे कस्यचित् ग्रामस्य निवासी अस्ति । तस्य कुटुम्बस्य पार्श्वे कापि भूमिः नास्ति अतः सः उच्चकृषकाणां कृते लघूनि लघूनि कार्याणि करोति । कार्यम् अनियमितं भवति एवञ्च आयः अपि तथैव भवति। अनेकवारं सः सम्पूर्णदिवसस्य श्रमस्य स्थाने ५०रूप्यकाणि एव लभते । परन्तु प्रायः क्षेत्रेषु आदिवसं श्रमं कृत्वा सः वस्तुरूपेण किञ्चित्किलोग्राममितं गोधूमं द्विदलम् अथवा स्वल्पं शाकम् एव लभते । अष्टसदस्यानां कुटुम्बः सदैव द्विकाल-भोजनस्य अपि व्यवस्थां कर्तुं विफलः भवति । लख्खासिंहः ग्रामाद् बहिः एकस्मिन् अपक्वे कुटिरे निवसति । कुटुम्बस्य महिलानां सम्पूर्णसमयः आदिवसं क्षेत्रेषु पश्चाहारस्य कर्तनेन एवञ्च क्षेत्रेभ्यः दाह्यकाष्ठानाम् अवचयनेन एव गच्छति। तस्य तपेदिक-रोगी पिता आसीत्। वर्षद्वयात् पूर्वं चिकित्साभावे सः मृत्युं गतः । अधुना तस्य माता अनेन रोगेण ग्रसिता अस्ति। तस्याः जीवनम् अपि शनैः शनैः क्षयि जायमानम् अस्ति। यद्यपि ग्रामे एकः प्राथमिक-विद्यालयः अस्ति तथापि लख्खासिंहः तत्रापि न गतः । वयसः दशमे वर्षे एव सः धनार्जनस्य आरम्भं कर्तुं बाध्यः अभवत् । नूतनवस्त्राणां क्रयणं कतिपयैः वर्षैः एव सम्भवति अपि च कुटुम्बस्य कृते फेनकं तैलं च अपि विलासिता अस्ति।

चित्रम् ३.२ लक्खासिंहस्य कथा

निर्धनतायाः उपर्युक्त-स्थितीनाम् अध्ययनं कुर्वन्तु अथ च निर्धनता-सम्बद्धानि निम्नलिखितानि प्रकरणानि अधिकृत्य चर्चां कुर्वन्तु

- भूमिहीनता
- अवृत्तिः
- कुटुम्बस्य आकारः
- निरक्षरता
- अभद्र-स्वास्थ्यम् / कुपोषणम्
- बालश्रमः
- असाहाय्यम्

उपरितने उभे विशिष्टे उदाहरणे निर्धनतायाः अनेकान् आयामान् दर्शयतः। एते उदाहरणे दर्शयतः यत् निर्धनतायाः अर्थः क्षुदामृत्युः एवञ्च अनाश्रयता इति वर्तते। निर्धनता नाम सा स्थितिः यदा मातापितरः स्वीयान् बालान् विद्यालयं प्रेषयितुं समर्थाः न भवन्ति अथवा कश्चन रोगी जनः चिकित्सां न प्राप्नोति। स्वच्छजलस्य अथ च स्वच्छता-सौविध्यानाम् अभावः इत्यपि निर्धनतायाः अर्थः अस्ति। नियमित-वृत्तेः तथा च न्यूनतम-शालीनतास्तरस्य अभावः अपि निर्धनतायाः अर्थः अस्ति। अन्ततः निर्धनतायाः अर्थः अस्ति असाहाय्यस्य भावनया सह जीवनम्। निर्धनजनाः एतादृश-स्थितौ जीवन-यापनं कुर्वन्ति यत्र तैः सह कृषिक्षेत्र-शिल्पशाला-शासनिककार्यालय-चिकित्सालय-रेलस्थानकेषु अपि च प्रायः सर्वेषु स्थानेषु दुर्व्यवहारः क्रियते। स्पष्टम् अस्ति यत् कोऽपि जनः निर्धनः भूत्वा जीवितुं न इच्छति।

स्वतन्त्र-भारतस्य महत्सु आह्वानेषु अन्यतमम् आह्वानं स्वीय-कोटिसंख्यक-जनानां दयनीय-निर्धनतातः बहिर्निष्कासनम् अस्ति। महात्मा गान्धी सदैव बलपूर्वकं कथयति स्म यत् भारतं सत्यार्थेषु तदैव स्वतन्त्रं भविष्यति यदा अत्रत्यः सर्वाधिकः निर्धनः जनः अपि मानवीय-व्यथातः मुक्तः भविष्यति।

सामाजिक-वैज्ञानिकानां मता निर्धनता

यतो हि निर्धनतायाः अनेके पक्षाः सन्ति अतः सामाजिक-वैज्ञानिकाः ताम् अनेक-सूचकानां माध्यमेन पश्यन्ति। आयस्य उपभोगस्य च स्तरेण सम्बद्ध-सूचकाः सामान्यतः प्रयुज्यमानाः सूचकाः सन्ति परन्तु अधुना निरक्षरता-स्तरः, कुपोषणकारणात् रोगप्रतिरोधि-क्षमतायां न्यूनता, स्वास्थ्य-सेवानां न्यूनता, वृत्तेः अवसराणां न्यूनता, सुरक्षित-पेयजलस्य स्वच्छतायाः च न्यूनता इत्यादीनां सामाजिक-सूचकानां माध्यमेन अपि निर्धनता दृश्यते। सामाजिकापवर्जनाधारितायाः अथ च असुरक्षाधारितायाः निर्धनतायाः विश्लेषणम् अधुना बहुसामान्यं जायमानम् अस्ति (कोष्ठकं पश्यन्तु)।

सामाजिकम् अपवर्जनम्

एतस्याः अवधारणायाः अनुसारं निर्धनाः समीचीनतर-वातावरणे निवसतां सम्पन्न-जनानां सामाजिक-साम्यात् अपवर्जिताः भूत्वा केवलं निकृष्ट-वातावरणे अपरैः निर्धनैः सह निवासं कर्तुं बाध्याः भवन्ति इति दृष्ट्या निर्धनता द्रष्टव्या। सामान्यार्थे सामाजिकम् अपवर्जनं निर्धनतायाः कारणं परिणामः च इति उभयात्मकं भवितुं शक्नोति। स्थूलरूपेण एतत् काचित् प्रक्रिया अस्ति यस्याः माध्यमेन जनाः समूहाः वा तेभ्यः सौविध्येभ्यः, लाभेभ्यः अवसरेभ्यः च अपवर्जिताः वर्तन्ते येषाम् उपभोगम् अन्ये (तेभ्यः उच्चतराः) जनाः कुर्वन्ति। भारते जाति-व्यवस्थायाः कार्य-शैली अस्याः एकं विशिष्टम् उदाहरणम् अस्ति। अस्यां जातिव्यवस्थायां कासाञ्चन जातीनां जनाः समानेभ्यः अवसरेभ्यः अपवर्जिताः वर्तन्ते। अनेन प्रकारेण सामाजिकम् अपवर्जनं जनानाम् आयं न केवलं बहुन्यूनीकरोति प्रत्युत अस्माद् अपि अधिकां हानिं करोति।

असुरक्षा

सुरक्षा नाम निर्धनतां प्रति कश्चन मापः अस्ति यः विशेषसमुदायानां (यथा कस्याश्चित् पश्चवर्तिजातेः जनाः) अथवा व्यक्तीनां (यथा काचिद् विधवा अथवा शारीरिकरूपेण विकलाङ्गः जनः) भावि-वर्षेषु निर्धनताम् अथवा निर्धनतायाः अधिक-सम्भावनां प्रकटयति। असुरक्षायाः निर्धारणं परिसम्पत्तेः, शिक्षायाः, स्वास्थ्यस्य अथ च वृत्तेः अवसररूपेण आजीविकाम् अन्वेष्टुं विभिन्न-समुदायानां पार्श्वे उपलब्ध-विकल्पानां द्वारा भवति। एतदतिरिक्तम् अस्याः विश्लेषणं प्राकृतिकापदां (भूकम्प-सुनामी) आतङ्कवादादिप्रकरणेषु एतेषां समूहानां समक्षं विद्यमानाः महाविपदः आधारीकृत्य क्रियते। अतिरिक्त-विश्लेषणम् एतासाम् आपदां निस्तारणस्य सामाजिकीम् आर्थिकीं च क्षमताम् आधारीकृत्य क्रियते। वस्तुतः यदा सर्वेषां जनानां कृते जलौघरूपेण भूकम्परूपेण अथवा वृत्तेः न्यूनावसररूपेण अशुभसमयः आगच्छति, अन्येषां जनानां तुलनायां अधिकप्रभावितभूतायाः बृहत्सम्भावनायाः निरूपणम् एव असुरक्षा अस्ति।

निर्धनता-रेखा

निर्धनताम् अधिकृत्य क्रियमाणायाः चर्चायाः केन्द्रे सामान्यतः निर्धनता-रेखायाः अवधारणा विद्यमाना भवति। निर्धनतायाः आकलनस्य एकः सर्वमान्यः विधिः आयम् अथवा उपभोगस्तरम् आधृत्य भवति। यदि कस्यचिद् जनस्य आयस्य उपभोगस्य वा स्तरः एतादृशात् न्यूनतम-स्तरात् अधः पतति यः मूलावश्यकतानां कमपि प्रदत्तं समूहं पूर्णं कर्तुम् आवश्यकः भवति तर्हि स जनः

निर्धनः मन्यते । मूलावश्यकताः पूरयितुम् आवश्यकानि वस्तूनि विभिन्न-कालेषु एवञ्च विभिन्न-देशेषु भिन्नानि भवन्ति । अतः स्थान-कालयोः अनुसारं निर्धनता-रेखा भिन्ना भवितुं शक्नोति । प्रत्येकं देशः कस्याश्चिद् काल्पनिक-रेखायाः प्रयोगं करोति । इयं रेखा विकासस्य अथ च तस्य स्वीकृतन्यूनतमसामाजिक-मानदण्डानां वर्तमान-स्तरानुरूपं मन्यते । उदाहरणार्थम् - अमेरिकायां सः जनः निर्धनः मन्यते यस्य पार्श्वे कारयानं न अस्ति अपरतः भारते अधुनापि कारयानस्य स्थापनं विलासिता मन्यते। भारते निर्धनता-रेखायाः निर्धारण-काले जीवन-निर्वाहार्थं खाद्यावश्यकता, वस्त्रम्, उपानहौ, इन्धनम्, प्रकाशः, शिक्षा एवञ्च चिकित्सा इत्यादिभिः सम्बद्धाः आवश्यकताः अधिकृत्य विचारः क्रियते। एताः भौतिकमात्राः रूप्यकेषु तदीय-मूल्यैः गुणीक्रियन्ते। निर्धनता-रेखायाः आकलन-समये खाद्यावश्यकतायाः कृते वर्तमानं सूत्रं वाञ्छित-कैलोर्यावश्यकताधृतम् अस्ति । अन्न-द्विदल-शाक-दुग्ध-तैल-शर्करादीनि खाद्यवस्तूनि मिलित्वा अस्याः आवश्यककैलोर्याः पूर्तिं कुर्वन्ति । आयुः लिङ्गम् अथ च कार्यशैली इत्यादीनि आधारीकृत्य कैलोर्याः आवश्यकताः परिवर्तन्ते । भारते स्वीकृता कैलोर्यावश्यकता ग्रामीण-क्षेत्रेषु २४००मिता-कैलोरी प्रतिव्यक्ति प्रतिदिनम् एवञ्च नगरीय-क्षेत्रेषु २१००मिता-कैलोरी प्रतिव्यक्ति प्रतिदिनम् अस्ति । यतो हि ग्रामीण-क्षेत्रेषु निवसन्तः जनाः अधिकं शारीरिकं कार्यं कुर्वन्ति अतः ग्रामीण-क्षेत्रेषु कैलोर्यावश्यकता नगरीयक्षेत्राणाम् अपेक्षया अधिका मन्यते । अन्नादिरूपेण एताः कैलोर्यावश्यकताः क्रेतुं प्रतिव्यक्ति मौद्रिक-व्ययः मूल्यानां वृद्धिं मनसि निधाय समये समये संशोध्यते ।

एतासां परिकल्पनानाम् आधारेण २०११-१२तमे वर्षे कस्याश्चित् व्यक्तेः कृते निर्धनतायाः निर्धारणं ग्रामीण-क्षेत्रेषु प्रतिमासं ८१६रूप्यकाणि नगरीयक्षेत्रेषु च प्रतिमासं १०००रूप्यकाणि इति कृतम् आसीत् । यद्यपि न्यूनकैलोर्यावश्यकता वर्तते तथापि नगरीयक्षेत्राणां कृते उच्चराशिः निश्चितः अस्ति यतो हि नगरीयक्षेत्रेषु अनेकेषाम् आवश्यकवस्तूनां मूल्यानि अधिकानि भवन्ति । अनेन प्रकारेण २०११-१२तमे वर्षे ग्रामीण-क्षेत्रेषु निवसन् पञ्चसदस्यानां कुटुम्बः निर्धनता-रेखायाः अधः भविष्यति यदि तस्य आयः प्रतिमासं प्रायः ४,०८०रूप्यकेभ्यः न्यूनः अस्ति । एतादृशानाम् एव कुटुम्बानां कृते नगरीय-क्षेत्रेषु स्वीयाः आवश्यकताः पूरयितुं प्रतिमासं न्यूनातिन्यूनं ५,०००रूप्यकाणाम् आवश्यकता भवति । निर्धनता-रेखायाः आकलनं समये समये (सामान्यतः प्रत्येकस्मिन् पञ्चमे वर्षे) प्रतिदर्श-सर्वेक्षणस्य माध्यमेन क्रियते । एतानि सर्वेक्षणानि **राष्ट्रिय-प्रतिदर्श-सर्वेक्षण-संघटनद्वारा** अर्थात् नेशनल सैंपल सर्वे ऑर्गनाजेशन इत्यनेन (एन.एस.एस.ओ.) कार्यन्ते तथापि विकासशील-देशानां मध्ये तुलनां कर्तुं विश्वबैङ्कसदृशानि अनेकानि अन्ताराष्ट्रिय-संघटनानि निर्धनता-रेखायाः कृते समान-मानकस्य प्रयोगं कुर्वन्ति यथा प्रतिदिनं प्रतिव्यक्ति एकडॉलरस्य समतुल्य-न्यूनतमोपलब्धतायाः आधारेण ।

आगच्छन्तु चर्चां कुर्याम

- विभिन्न-देशाः विभिन्न-निर्धनता-रेखाणां प्रयोगं किमर्थं कुर्वन्ति ?
- भवतां मतानुसारं भवतां क्षेत्रे न्यूनतमः आवश्यक-स्तरः कः भविष्यति ?

निर्धनतायाः अनुमानानि

३.१तालिकातः स्पष्टम् अस्ति भारते निर्धनतानुपाते १९९३-९४तमवर्षस्य प्रायः प्रतिशतं ४५तः २००४-०५तमे वर्षे प्रतिशतं ३७.२पर्यन्तं महत्त्वपूर्णा अपचितिः आगता अस्ति । २०११-१२तमे वर्षे निर्धनता-रेखायाः अधः वर्तिनां निर्धनानाम् अनुपातः इतोऽपि अपचितः भूत्वा प्रतिशतं २१.९मितः जातः अस्ति । यदि इयम् एव प्रवृत्तिः नैरन्तर्येण प्रवर्तमाना भविष्यति तर्हि आगामिषु केषुचिद् वर्षेषु निर्धनता-रेखायाः अधोवर्तिनां जनानां संख्या प्रतिशतं २१.९मिता अपचिता भविष्यति । यद्यपि निर्धनता-रेखायाः अधोवर्तिनां जनानां प्रतिशतं पूर्वदशकद्वये (१९७३-९३) अपचितं जातम् अस्ति । निर्धनजनानां संख्या २००४-०५तमे वर्षे ४०७.१मिलियनतः अपचिता भूत्वा २६९.३मिलियनमिता जाता । २०११-१२तमे वर्षे मध्यमाना अपचितिः प्रतिशतं २.२तः २००४-०५ तमवर्षात् २०११-१२ मध्ये जाता अस्ति ।

तालिका ३.१ भारते निर्धनतायाः अनुमानानि

	निर्धनतानुपातः (प्रतिशतम्)			निर्धनानां संख्या (कोटिः)		
वर्षम्	ग्रामीणाः	नगरीयाः	योगः	ग्रामीणाः	नगरीयाः	संयुक्तयोगः
१९९३-९४	५०.१	३१.८	४५.३	३२८.६	७४.८	४०३.७
२००४-०५	४१.८	२५.७	३७.२	३२६.३	८०.८	४०७.१
२०११-१२	२५.७	१३.७	२१.९	२१६.५	५२.८	२६९.३

स्रोतः योजनायोगः २०१४, वित्तमन्त्रालयः भारतशासनम्

आगच्छन्तु चर्चां कुर्याम

३.१तालिकायाः अध्ययनं कुर्वन्तु अथ च निम्नप्रश्नानाम् उत्तराणि यच्छन्तु

- १९९३-९४ अथ च २००४-०५ वर्षाणां मध्ये निर्धनतानुपाते अपचित्यां सत्याम् अपि निर्धनानां संख्या प्रायः ४०७कोटिमिता कथम् अवर्तत ?
- किं भारते निर्धनतायां न्यूनतायाः गतिः ग्रामीणभारते नगरीयभारते च समाना अस्ति ?

असुरक्षित-समूहः

निर्धनतारेखायाः अधः जीवन-यापनं कुर्वतां जनानाम् अनुपातः अपि भारते सर्वेषु सामाजिक-समूहेषु आर्थिक-वर्गेषु च समानः नास्ति। ये सामाजिक-समूहाः निर्धनतां प्रति सर्वाधिकम् असुरक्षिताः सन्ति ते अनुसूचित-जातेः एवञ्च अनुसूचित-जनजातेः कुटुम्बाः सन्ति। अनेन एव प्रकारेण आर्थिक-समूहेषु सर्वाधिकम् असुरक्षिताः समूहाः ग्रामीण-कृषि-श्रमिक-कुटुम्बाः अथ च नगरीयाः अनियत-श्रमिक-कुटुम्बाः सन्ति। ३.१आरेखे एतेषां सर्वेषां निर्धन-जनानां प्रतिशतं दर्शितम् अस्ति। यद्यपि निर्धनता-रेखायाः अधः वर्तिनां जनानां मध्यमानं भारते सर्वेषां समूहानां कृते षड्विंशतिः अस्ति तथापि अनुसूचित-जनजातेः प्रतिशतम् एकपञ्चाशत् जनाः स्वीयाः मूलावश्यकताः पूरयितुम् असमर्थाः सन्ति। अनेन एव प्रकारेण नगरीय-क्षेत्रेषु प्रतिशतं पञ्चाशत् अनियत-श्रमिकाः निर्धनता-रेखायाः अधः सन्ति। प्रायः प्रतिशतं पञ्चाशत् भूमिहीन-कृषिश्रमिकाः एवञ्च प्रतिशतं त्रिचत्वारिंशत् (४३) अनुसूचित-जातयः अपि निर्धनाः सन्ति। अनुसूचित-जातेः अनुसूचित-जनजातेः सामाजिक-रूपेण सौविध्य-वञ्चितानां सामाजिक-समूहानां भूमि-हीनाः अनियताः दिहाडी-श्रमिकाः सन्ति इति तेषां द्वैधासौविध्यस्य समस्यां दर्शयति।

आरेखः ३.१ भारते निर्धनता ,२०११-१२ सर्वाधिकः असुरक्षितसमूहः



स्रोतः पाणिग्राही अरविन्दः एवञ्च विशालमोरेः

चित्रम् ३.३ शिवरमणस्य कथा

सद्यस्तनैः अध्ययनैः ज्ञातम् अस्ति यत् १९९०तमे दशके अनुसूचित-जनजाति-कुटुम्बान् अतिरिच्य अन्येषु त्रिषु समूहेषु (अनुसूचित-जातिः, ग्रामीण-कृषि-श्रमिकाः अथ च नगरीयाः अनियमित-श्रमिक-कुटुम्बाः) निर्धनता न्यूनतां प्राप्ता अस्ति।

एतान् सामाजिक-समूहान् अतिरिच्य कुटुम्बेषु अपि आयः असमानः अस्ति । निर्धन-कुटुम्बेषु सर्वैः जनैः काठिन्यानि अभिमुखीकरणीयानि भवन्ति परञ्च केचन जनाः अन्येषाम् अपेक्षया अधिकं काठिन्यानि अभिमुखीकुर्वन्ति। महिलाः वृद्धाः बालिकाश्च सुव्यवस्थितरीत्या कुटुम्बस्य उपलब्ध-संसाधनानां प्राप्तितः अपि वञ्चिताः क्रियन्ते। अतः महिलासु शिशुषु (विशेषेण बालिकासु) एवञ्च वृद्ध-निर्धनेषु अपि निर्धनाः भवन्ति (कोष्ठकं पश्यन्तु)।

शिवरमणस्य कथा

शिवरमणः तमिलनाडोः करूर-नगरस्य निकटे कस्मिंश्चिद् लघुग्रामे निवसति । करूर-नगरं हस्तवयन-यन्त्रस्य वैद्युत-वयनयन्त्रस्य च तदीय-वस्त्राणां कृते प्रसिद्धम् अस्ति । ग्रामे शतं कुटुम्बाः निवसन्ति । शिवरमणः आर्युथान्थियार-जातेः (पादुकारः) अस्ति। अधुना सः प्रतिदिनं पञ्चाशद्-रूप्यकमानेन एककृषि-श्रमिकरूपेण कार्यं करोति । परन्तु सः तत् कार्यं वर्षे केवलं पञ्चषान् मासान् यावद् एव प्राप्नोति। अन्यस्मिन् समये सः ग्रामे अन्यानि लघूनि कार्याणि करोति। तस्य पत्नी शशिकला अपि तेन सह कार्यं करोति। परन्तु एषु दिवसेषु सा यदा कदाचिद् एव कार्याणि लभते। लभ्यते अपि चेद् तस्य एव कार्यस्य कृते यद् शिवरमणः करोति तदर्थं सः पञ्चविंशतिं रूप्यकाणि प्रतिदिनं लभते। शिवरमणस्य पञ्चषष्टिवर्षीया विधवा

रुग्णा माता अस्ति। सा दैनिक-कार्येषु आवश्यकताम् अनुभवति। तस्य पञ्चविंशति-वर्षीया एका अविवाहिता भगिनी अस्ति तस्य च १तः१६वर्षपर्यन्ताः चत्वारः बालाः सन्ति। तेषु तिस्रः पुत्र्यः सन्ति जयेष्ठः च पुत्रः अस्ति। कापि बालिका विद्यालयं न गच्छति। बालिकानां कृते विद्यालयस्य पुस्तकानाम् अन्येषां च वस्तूनां क्रयणं विलासिता अस्ति। एतत् तस्य सामर्थ्यात् बहिः अस्ति। पुनश्च एकदा तासां विवाहः अपि करणीयः अस्ति अतः सः इदानीं तासां शिक्षायैः व्ययं न कर्तुम् इच्छति। तस्य माता इदानीं जीवितुं न इच्छति। सा मृत्युं प्रतीक्षमाणा अस्ति। तस्य भगिनी एवञ्च ज्येष्ठा पुत्री गृहे कार्यं कुरुतः। शिवरमणः स्वपुत्रं तस्मिन् द्वितीय-वयः प्राप्ते सति विद्यालयं प्रेषयितुम् इच्छति। तस्य अविवाहित-भगिन्याः तस्य पत्न्या सह सम्बन्धाः मधुराः न सन्ति। शशिकला तां भारभूतां मन्यते। परन्तु शिवरमणः धनस्य अभावात् तस्याः कृते योग्य-वरम् अन्वेष्टुम् असमर्थः आसीत्। यद्यपि तस्य कुटुम्बस्य कृते कालद्वयस्य रोटिकायाः व्यवस्था अपि काठिन्येन भवति स्म तथापि शिवरमणः केवलं स्वस्य पुत्रस्य कृते यदा कदा दुग्धस्य क्रयणं करोति ।

आगच्छन्तु चर्चां कुर्याम

स्वीय-परिवेशे विद्यमानान् कांश्चन निर्धन-कुटुम्बान् अवलोकयन्तु एतत् च ज्ञातुं प्रयासं कुर्वन्तु यत् ---

- ते केन सामाजिकेन एवञ्च आर्थिकेन समूहेन सह सम्बद्धाः सन्ति ?
- कुटुम्बे धनार्जकाः सदस्याः के सन्ति ?
- कुटुम्बे वृद्धानां स्थितिः कीदृशी अस्ति ?
- किं सर्वे बालकाः (बालकाः बालिकाश्च) विद्यालयं गच्छन्ति ?

अन्ताराज्यीयाः असमानताः

भारते निर्धनतायाः इतोऽपि कश्चन पक्षः आयामः वा अस्ति। प्रत्येकस्मिन् राज्ये निर्धन-जनानाम् अनुपातः समानः नास्ति। यद्यपि १९७०तमदशकस्य प्रारम्भात् राज्यस्तरीय-निर्धनतायां सुदीर्घकालिकी न्यूनता संजाता अस्ति तथापि निर्धनता-न्यूनीकरणे सफलता-मितिः विभिन्न-राज्येषु पृथक् पृथक् अस्ति। २०११-१२तमवर्षयोः भारते निर्धनतानुपातः प्रतिशतं द्वाविंशतिमितः अस्ति। मध्य-प्रदेशः, असमः, उत्तर-प्रदेशः, बिहारः एवञ्च ओडिशा इति केषुचिद् राज्येषु निर्धनतानुपातः राष्ट्रियानुपाताद् अधिकः अस्ति। यथा ३.२आरेखे दर्शितम् अस्ति यत् बिहारः प्रतिशतम् ३३.७मितनिर्धनता-मध्यमानेन अथ च ओडिशा प्रतिशतं ३२.६मित-निर्धनता-मध्यमानेन सह द्वे सर्वाधिक-निर्धनराज्ये वर्तेते। ओडिशायां मध्यप्रदेशे बिहारे उत्तरप्रदेशे च ग्रामीण-निर्धनतया सहैव नगरीय-निर्धनता अपि अधिका अस्ति।

एतत्-तुलनायां केरले जम्मूकश्मीरे आन्ध्रप्रदेशे तमिलनाडौ गुजराते पश्चिम-बङ्गाले च निर्धनतायाम् उल्लेखनीया अपचितिः सञ्जाता अस्ति। पञ्जाब-हरियाणा-सदृशानि राज्यानि उच्चकृषि-वृद्धिमित्या निर्धनतायाः न्यूनीकरणे सफलानि जातानि। केरलेन मानव-संसाधन-विकासं प्रति अधिकम् अवधानं कृतम् अस्ति। पश्चिमबङ्गाले भूमि-संस्करणोपायैः निर्धनता-न्यूनीकरणे साहाय्यं लब्धम् अस्ति। आन्ध्रप्रदेशे तमिलनाडौ च अन्नस्य सार्वजनिक-वितरणम् अस्मिन् संस्करणस्य कारणभूतं भवितुं शक्नोति।

वैश्विक-निर्धनतापरिदृश्यम्

विकासशील-देशेषु अतीव-निर्धनतायां जीवतां जनानाम् अनुपातः (विश्ववित्तकोशस्य परिभाषानुसारं प्रतिदिनम् $१.२५तः न्यूने जीवननिर्वाहकरणम्) १९९०तमाब्दस्य ४३प्रतिशतात् अपचितः भूत्वा २००८तमे वर्षे प्रतिशतं २२मितः सञ्जातः अस्ति। यद्यपि वैश्विक-निर्धनतायाम् उल्लेखनीया अपचितिः जाता अस्ति परन्तु अस्यां बृहत्-क्षेत्रीय-भिन्नताः प्राप्यन्ते। तीव्रार्थिक-प्रगतिकारणात् एवञ्च मानव-संसाधन-विकासे बृहन्निवेश-कारणात् चीने अथ च दक्षिणपूर्वैशियायाः देशेषु निर्धनतायां विशेष-न्यूनता जाता अस्ति। चीने निर्धनानां संख्या १९८१तमाब्दस्य ८५प्रतिशतात् अपचिता भूत्वा २००८तमे वर्षे प्रतिशतं १४मिता एवञ्च २०११तमे वर्षे प्रतिशतं ६मिता अङ्किता। दक्षिणैशियायाः देशेषु (भारत-पाकिस्तान-श्रीलङ्का-नेपाल-बाङ्ग्लादेश-भूटानेषु) निर्धनानां संख्यायाम् अपचितिः तावती तीव्रा नास्ति। निर्धनानां प्रतिशते अपचित्यां सत्याम् अपि निर्धनानां संख्यायां स्वल्पा एव न्यूनता आगता अस्ति। इयं न्यूनता १९८१तमवर्षे ६१प्रतिशतात् अपचिता भूत्वा २००८तमे वर्षे प्रतिशतम् ३६मिता जाता अस्ति। भिन्न-निर्धनता-रेखायाः परिभाषाकारणात् भारते अपि निर्धनता राष्ट्रियानुमानाद् अधिका अस्ति।

आरेखः ३.२ भारतस्य चितेषु राज्येषु निर्धनतानुपातः



स्रोतः आर्थिकसर्वेक्षणम् २०१३-१४, वित्तमन्त्रालयः भारतशासनम्

आगच्छन्तु चर्चां कुर्याम

आरेखस्य अध्ययनं कृत्वा निम्नलिखितं कार्यं कुर्वन्तु --

- त्रयाणां राज्यानाम् अभिज्ञानं कुर्वन्तु यत्र निर्धनतानुपातः सर्वाधिकः अस्ति।
- त्रयाणां राज्यानाम् अभिज्ञानं कुर्वन्तु यत्र निर्धनतानुपातः न्यूनतमः अस्ति।

सब-सहारा-अफ्रिकायां निर्धनता वस्तुतः १९८१तमवर्षस्य ५१प्रतिशतात् वर्धिता भूत्वा २००८तमे वर्षे प्रतिशतं ४७मिता जाता (३.१आरेखं पश्यन्तु)। लैटिन-अमेरिकायां निर्धनतायाः अनुपातः तदेव अवर्तत। अत्र निर्धनता-रेखा १९८१तमाब्दस्य ११प्रतिशतात् अपचिता भूत्वा २००८तमे वर्षे प्रतिशतं ६.४मिता जाता अस्ति। (३३आरेखं पश्यन्तु) रूस-सदृशेषु पूर्वसमाजवादि-देशेषु अपि निर्धनता पुनः व्याप्ता अस्ति। एषु देशेषु पूर्वम् आधिकारिक-रूपेण कापि निर्धनता न आसीद् एव। ३.२तालिका अन्ताराष्ट्रिय-निर्धनतारेखायाः परिभाषानुसारम् (अर्थात् प्रतिदिनम् एकडॉलरस्य अधोवर्ति-जनसंख्या) विभिन्न-देशेषु निर्धनतायाः अधोवर्तिनां जनानाम् अनुपातं दर्शयति। संयुक्त-राष्ट्रस्य **सहस्राब्दि-विकास-लक्ष्यैः** घोषणं कृतम् अस्ति यत् प्रतिदिनं १.२५डॉलरतः न्यूने जीवन-यापनं कुर्वतां जनानां संख्या २०१५तमवर्षं यावत् १९९०तमवर्षस्य स्तरस्य अर्धा भविष्यति।

आगच्छन्तु चर्चां कुर्याम

३.४आरेखस्य अध्ययनं कृत्वा निम्नलिखितं कार्यं कुर्वन्तु --

- विश्वस्य तेषां क्षेत्राणाम् अभिज्ञानं कुर्वन्तु यत्र निर्धनतानुपाते अपचितिः) जाता अस्ति।
- विश्वस्य तस्य क्षेत्रस्य अभिज्ञानं कुर्वन्तु यत्र निर्धनानां संख्या सर्वाधिका अस्ति।

तालिका ३.२ : निर्धनता : केषाञ्चन अवचिता-देशानां मध्ये तुलना

देशाः	प्रतिदिनम् १.२५डॉलरतः न्यूनं लभमानानां जनानां संख्या
1. नाइजीरिया	६२
2. बाङ्ग्लादेशः	४३
3. भारतम्	२५
4. पाकिस्तानम्	१३
5. चीनः	६
6. ब्राजीलः	५
7. इण्डोनेशिया	१६
8. श्रीलङ्का	४

स्रोतः मानवविकासरिपोर्ट २०१४, संयुक्तराष्ट्रविकासकार्यक्रमः

आरेखः ३.३ प्रतिदिनं $१.२५मितमानेन जीवनयापनं कुर्वन्तः जनाः



स्रोतः विश्वविकाससूचकम् २०१२, विश्ववित्तकोषः

आरेखः ३.४ क्षेत्रानुसारं निर्धनानां सङ्ख्या ($१.२५प्रतिदिनम्) कोटिमिता १९८०-२०११



स्रोतः विश्वविकाससूचना २०१२ विश्ववित्तकोषः

निर्धनतायाः कारणानि

भारतेव्यापक-निर्धनतायाःअनेकानिकारणानिसन्ति।तेषुएकंकारणम् औपनिवेशिक-प्रशासनकाले आर्थिक-विकासस्यनिम्न-स्तरःअस्ति। औपनिवेशिक-शासनस्य नीतिकारणात् पारम्परिक-हस्तशिल्पकला नष्टा तथा च वस्त्रसदृशानाम् उद्योगानां विकासः हतोत्साहितः कृतः। १९८०तमदशकं यावत् विकासस्य मन्दगतिः प्रावर्तत । एतत्-परिणामतः वृत्तेः अवसराः न्यूनाः अभवन् एवञ्च आयस्य वृद्धि-मितिः अपचिता। अनेन सहैव जनसंख्यायाम् उच्च-मित्या वृद्धिः अभवत्। एतद्-द्वयेन प्रतिव्यक्ति आयस्य संवृद्धि-मितिः बहुन्यूनीकृता । आर्थिक-प्रगतेः वर्धने एवञ्च जनसंख्या-नियन्त्रणे असाफल्यं प्राप्तम् इति कारणात् निर्धनतायाः चक्रं यथावत् अवर्तत।

सेचनस्य हरित-क्रान्तेः च प्रसारात् कृषि-क्षेत्रके वृत्तेः अनेके अवसराः सृजिताः अभवन्। परन्तु एतेषां प्रभावः भारतस्य कांश्चन भागान् यावद् एव सीमितः अवर्तत । उभाभ्यां सार्वजनिक-नैज-क्षेत्राभ्यां काश्चन वृत्तयः उपलब्धाः कारिताः । परन्तु वृत्तीनाम् अन्वेषकेभ्यः सर्वेभ्यः जनेभ्यः एताः वृत्तयः पर्याप्ताः न अभवन्। नगरेषु उपयुक्तवृत्तिप्राप्तौ विफलीभूताः अनेके जनाः रिक्शाचालकरूपेण विक्रेतृरूपेण गृहनिर्माणश्रमिकरूपेण गृहसेवकरूपेण च कार्याणि कर्तुम् आरब्धवन्तः। अनियमितता आसीत् अपि च आयः अल्पः आसीत् इति कारणात् एते जनाः महार्घगृहेषु निवसितुं सक्षमाः न आसन्। ते नगरेभ्यः बहिः निम्नगृहेषु वसितुम् आरब्धवन्तः। एवं निर्धनतायाः समस्याः याः मुख्यतः काश्चन ग्रामीणपरिघटनाः आसन्, नगरीयक्षेत्रस्य काचित् विशेषता संजाताः।

उच्चनिर्धनतामितेः इतोऽपि अन्या विशेषता आयस्य असमानता इति अस्ति । अस्याः किञ्चन प्रमुखकारणं भूमेः अन्येषां च संसाधनानाम् असमानवितरणम् इति अस्ति । यद्यपि अनेकाः नीतयः सन्ति तथापि अस्माभिः केनापि सार्थकविधिना अस्य प्रकरणस्य निस्तारः न कर्तुम् अशक्यत। ग्रामीणक्षेत्रेषु परिसम्पत्तीनां पुनर्वितरणाभिलक्षितः भूमिपरिष्कारसदृशः प्रमुखः नीतिसमारम्भः अधिकतरराज्यशासनैः प्रभाविरीत्या क्रियापथं न आनीतः । यतो हि भारते भूमिसंसाधनानां न्यूनता निर्धनतायाः किञ्चन प्रमुखकारणम् अवर्तत अतः अस्याः नीतेः उचितक्रियान्वयनेन कोटिसंख्याकानां ग्रामीणनिर्धनानां जीवनपरिष्कारः कर्तुं शक्यते स्म। अन्यानि सामाजिकानि सांस्कृतिकानि आर्थिकानि च कारकाणि अपि निर्धनतायै उत्तरदायीनि सन्ति । भारते अतिनिर्धनसहिताः जनाः सामाजिकदायित्वेषु धार्मिकानुष्ठानानां च आयोजनेषु बहुधनं व्ययीकुर्वन्ति । लघुकृषकाणां कृते बीजोर्वर्क-कीटनाशकसदृशानां कृष्यागतानां क्रयणाय धनराशेः आवश्यकता भवति । यतो हि निर्धनजनाः कठिनतया एव किमपि संरक्षणं कर्तुं समर्थाः भवन्ति अतः ते एषां कृते (बीजादीनां कृते) ऋणं स्वीकुर्वन्ति । निर्धनताकारणात् एव पुनः निस्तारणे असमर्थता भवति इत्यतः ते ऋणग्रस्ताः भवन्ति। अतः अत्यधिका ऋणग्रस्तता निर्धनतायाः कारणं परिणामः च इति उभयम् अस्ति।

निर्धनतानिरोधिनः उपायाः

निर्धनतायाः उन्मूलनं भारतस्य विकासरणनीतेः किञ्चन प्रमुखम् उद्देश्यम् अस्ति । शासनस्य वर्तमाननिर्धनता-निरोधिरणनीतिः स्थूलरूपेण १. **आर्थिकसमृद्धेः** प्रोत्साहनम् अथ च २. **लक्षितनिर्धनतानिरोधी** कार्यक्रमः इति द्वयं कारकम् आश्रयति।

१९८०तमदशकस्य प्रारम्भं यावत् समाप्तिं गतानां ३०वर्षाणाम् अवधौ प्रतिव्यक्ति आये कापि वृद्धिः न अभवत् एवञ्च निर्धनतायाम् अपि कापि न्यूनता न अभवत् । १९५०तमदशकस्य आरम्भे आधिकारिकनिर्धनतायाः अनुमानं प्रतिशतं ४५मितम् आसीत् एवञ्च १९८०तमदशकस्य आरम्भे अपि तथावत् अवर्तत । १९८०तमदशकात् आरभ्य भारतस्य आर्थिकसंवृद्धि-मितिः विश्वे सर्वाधिका आसीत् । संवृद्धिमितिः प्रायः १९७०तमदशकावधौ प्रतिशतात् ३.५मितमध्यमानात् समेध्य १९८०-१९९०तमे दशके प्रतिशतं प्रायः ६मिता अभवत्। विकासस्य उच्चमितिः निर्धनतायाः न्यूनीकरणे महत्त्वपूर्णां भूमिकाम् ऊढवती। अतः एतत् स्पष्टं जायमानम् अस्ति यत् आर्थिकसंवृद्धेः निर्धनतोन्मूलनस्य च मध्ये कश्चन घनिष्ठसम्बन्धः अस्ति । आर्थिकसंवृद्धिद्वारा अवसराः व्यापकाः भवन्ति अपि च मानवविकासे निवेशार्थम् आवश्यकसंसाधनानि उपलब्धानि संजायन्ते । इयं शिक्षायां निवेशात् अधिकस्य आर्थिकप्रतिफलस्य प्राप्तेः आशायां जनान् तेषां बालिकासहितान् बालान् विद्यालयेषु प्रेषयितुं प्रेरयति। तथापि एतत् सम्भवम् अस्ति यत् आर्थिकविकासेन सृष्टेभ्यः अवसरेभ्यः निर्धनजनाः प्रत्यक्षलाभं न स्वीकर्तुम् अशक्नुवन् । एतद् अतिरिच्य कृषिक्षेत्रके संवृद्धिः अपेक्षानुगुणं बहुन्यूना अवर्तत। इयं निर्धनतां प्रत्यक्षं प्रभावितवती यतो हि निर्धनानां कश्चन विशालभागः ग्रामेषु निवासं करोति अपि च कृषिम् आश्रयति।

एतासु स्थितिषु लक्षितनिर्धनता-निरोधि-कार्यक्रमाणां स्पष्टा आवश्यकता अस्ति। यद्यपि एतादृश्यः अनेकाः योजनाः सन्ति याः प्रत्यक्षं परोक्षं वा निर्धनतां न्यूनीकर्तुं निर्मिताः सन्ति। एतासु कासाञ्चन उल्लेखः अत्र आवश्यकः अस्ति। राष्ट्रियग्रामीणवृत्तिप्रतिभूः २००५ इति अधिनियमः २००५तमे वर्षे पारितः आसीत् । ग्रामीणक्षेत्रेषु आजीविकायाः सुरक्षणाय प्रत्येकं गृहस्य कृते पारिश्रमिक-वृत्तिः न्यूनातिन्यूनं१००दिनानांकृतेउपलब्धाभवेत्इतिअस्यउद्देश्यम्अस्ति। अस्य उद्देश्यं सततविकासे साहाय्यकरणम् अस्ति येन अनावृष्टि-वनकर्तन-मृदाक्षरणसदृशीभ्यः समस्याभ्यः आत्मानं रक्षितुं शक्नुयाम। एतत्-प्रावधानान्तर्गतं वृत्तीनां १/३मितः भागः महिलानां कृते सुरक्षितः अस्ति। अस्याः योजनायाः अन्तर्गतं ४.७८कोटिकुटुम्बेभ्यः

प्रतिव्यक्ति २२०कोटिमिताः वृत्तयः सुलभायिताः सन्ति । एतद्-योजनान्तर्गतम् अनुसूचितजातीनाम् अनुसूचितजनजातीनां महिलानां च भागः क्रमशः प्रतिशतं २३मितः प्रतिशतं १७मितः एवञ्च प्रतिशतं ५३मितः अस्ति । सामान्यवृत्तेः मानदेयं २००६-०७तमे वर्षे ६५तः वर्धयित्वा २०१३-१४तमवर्षे १३२रूप्यकात्मकं कृतम् अस्ति । केन्द्रशासनं **राष्ट्रियवृत्तिप्रतिभूकोषस्य** अपि स्थापनां करिष्यति । अनेन एव प्रकारेण राज्यशासनानि अपि योजनायाः क्रियान्वयनाय **राज्यवृत्तिप्रतिभूकोषस्य** स्थापनां करिष्यन्ति । कार्यक्रमान्तर्गतं यदि आवेदकाय १५दिनानाम् अभ्यन्तरे वृत्तिः न प्रदीयते तर्हि सः दैनिकावृत्ति-पारिश्रमिकस्य अधिकारी भविष्यति । **कार्यस्य स्थाने अन्नम्** इति राष्ट्रियकार्यक्रमः काचित् अन्या महत्त्वपूर्णा योजना अस्ति । अयं कार्यक्रमः २००४तमे वर्षे देशस्य सर्वाधिकपश्चवर्तिषु १५०जनपदेषु प्रवर्तितः आसीत् । अयं कार्यक्रमः तेषां सर्वेषां ग्रामीणनिर्धनानां कृते अस्ति येषां कृते पारिश्रमिकरूपेण वृत्तेः आवश्यकता अस्ति अपि च ये अकुशलशारीरिककार्याणि कर्तुम् इच्छुकाः सन्ति । अस्य कार्यान्वयनं पूर्णतः केन्द्रीयवित्तपोषित-कार्यक्रमस्य रूपेण कृतम् अस्ति एवञ्च राज्येभ्यः खाद्यान्नानि निःशुल्कं सुलभायमानानि सन्ति । एकवारं राष्ट्रियग्रामीणवृत्तिप्रतिभू योजना प्रवर्तिता भवति चेत् कार्यस्य स्थाने अन्नम् इति कार्यक्रमः अपि एतत्-कार्यक्रमान्तर्गतः भविष्यति ।

प्रधानमन्त्रिवृत्तियोजना काचित् अन्या योजना अस्ति या १९९३ तमे ख्रिस्तवर्षे आरब्धा । ग्रामीणक्षेत्रेषु लघुनगरेषु च शिक्षितानां परन्तु अवृत्तिकानां युवकानां कृते स्वाजीविकायाः अवसराणां सर्जनम् इति अस्य कार्यक्रमस्य उद्देश्यम् अस्ति । लघुव्यवसायानां प्रसङ्गे एवञ्च उद्योगस्थापनायाः सन्दर्भे तेषां साहाय्यं क्रियते । **ग्रामीणवृत्तिसर्जनम्** इति कार्यक्रमस्य आरम्भः १९९५तमे ख्रिस्तवर्षे कृतः । ग्रामीणक्षेत्रेषु लघुनगरेषु च स्वाजीविकायाः अवसराणां सर्जनम् इति अस्य कार्यक्रमस्य उद्देश्यम् अस्ति । दशम्यां पञ्चवार्षिकयोजनायाम् एतत्कार्यक्रमान्तर्गतं २५लक्षनूतनवृत्तीनाम् अवसराणां सर्जनस्य लक्ष्यं निर्धारितम् । **स्वर्ण जयन्तीग्रामस्वाजीविकायोजना** १९९ तमे ख्रिस्तवर्षे आरब्धा । सहायताप्राप्तानां निर्धनकुटुम्बानां स्वसहायतासमूहेषु सङ्घटनं कृत्वा वित्तकोषऋणस्य शासनिकसहायिक्याः च संयोजनद्वारा निर्धनतारेखातः उत्थानम् इति अस्य कार्यक्रमस्य उद्देश्यम् अस्ति । **प्रधानमन्त्रिग्रामोदययोजना** २००० तमे ख्रिस्तवर्षे आरब्धा । एतद्-योजनान्तर्गतं प्राथमिकस्वास्थ्यं प्राथमिकशिक्षा ग्रामीणाश्रयः ग्रामीणपेयजलम् अथ च ग्रामीणविद्युतीकरणम् इत्येवम्प्रकाराणां मूलसौविध्यानां कृते राज्येभ्यः अतिरिक्तं केन्द्रीयसाहाय्यं प्रदीयते । अन्त्योदययोजना इति काचित् अन्या योजना अस्ति यस्याः विषये वयम् अग्रिमे अध्याये विस्तरेण सह पठिष्यामः ।

एतेषां कार्यक्रमाणां सम्मिश्रिताः परिणामाः अभवन् । ते अल्पप्रभाविणः सन्ति इत्यस्य किञ्चन मुख्यकारणम् उचितकार्यान्वयनस्य अथ च उपयुक्तलक्ष्यनिर्धारणस्य न्यूनता इति अस्ति । एतदतिरिक्तं काश्चन योजनाः परस्परं व्यापिन्यः अपि सन्ति । उचितोद्देशे सति अपि एतासां योजनानां लाभान् तासां योजनानां पात्राः निर्धनाः पूर्णतः न प्राप्तवन्तः । अतः सद्यस्तनेषु वर्षेषु निर्धनतोन्मूलन-कार्यक्रमाणाम् उचितपरिवीक्षणं प्रति समधिकं बलं कृतम् अस्ति ।

भाविसमाह्वानानि

भारते निश्चितरूपेण निर्धनतायाम् अपचितिः अङ्किता अस्ति परन्तु प्रगत्यां सत्याम् अपि निर्धनतोन्मूलनं भारतस्य किञ्चन बहुबाध्यकारि समाह्वानम् अस्ति । ग्रामीण-नगरीयक्षेत्राणां मध्ये तथैव विभिन्नराज्यानां मध्ये निर्धनतायां व्यापिनी असमानता अस्ति । केचन सामाजिकाः आर्थिकाः च समूहाः निर्धनतां प्रति अधिकम् असुरक्षिताः सन्ति । आशा क्रियमाणा अस्ति यत् निर्धनतोन्मूलने आगामिषु १०तः१५ वर्षेषु समधिका प्रगतिः भविष्यति । एतत् मुख्यतः उच्चार्थिकसंवृद्धिः, सर्वजनीन-निःशुल्क-प्राथमिकशिक्षां प्रति बलं, जनसंख्याविकासे अपचितिः, महिलानाम् अथ च समाजस्य आर्थिकरूपेण निर्बलवर्गाणां वर्धमानसशक्तीकरणम् इति एतेषां कारणात् सम्भवं भवितुं शक्ष्यति ।

जनानां कृते निर्धनतायाः आधिकारिकपरिभाषा तेषां केवलं कस्यचित् सीमितभागस्य सन्दर्भे घटते । इयं न्यूनतमजीवननिर्वाहस्य उचितस्तरस्य अपेक्षया जीवननिर्वाहस्य न्यूनतमस्तरविषयका अस्ति । अनेकैः बुद्धिजीविभिः अस्य समर्थनं कृतम् अस्ति यत् निर्धनतायाः या अवधारणा अस्ति तस्याः अवधारणायाः विस्तारः मानवनिर्धनतापर्यन्तं करणीयः इति । भवितुं शक्नोति यत् विशालसंख्यायां जनाः स्वीयभोजनस्य व्यवस्थां कर्तुं समर्थाः स्युः परन्तु किं तेषां पार्श्वे शिक्षा अस्ति ? अथवा गृहाणि सन्ति ? अथवा स्वास्थ्यसेवायाः सौविध्यानि सन्ति ? अथवा आजीविकायाः सुरक्षा अस्ति ? अथवा आत्मविश्वासः अस्ति ? किं ते जातिलिङ्गाधृतात् भेदभावात् मुक्ताः सन्ति ? किं बालश्रमस्य प्रथा अधुना अपि प्रचलिता अस्ति ? विश्वव्यापिनः अनुभवं बोधयन्ति यत् विकासेन सह निर्धनतायाः परिभाषा अपि परिवर्तते । निर्धनतोन्मूलनं सदा किञ्चन गतिशीलं लक्ष्यम् अस्ति । आशा अस्ति यत् वयम् आगामिदशकस्य अन्तं यावत् सर्वेभ्यः जनेभ्यः केवलम् आयस्य सन्दर्भे न्यूनतमम् आवश्यकम् आयं सुलभायितुं समर्थाः भविष्यामः । सर्वेषां कृते स्वास्थ्यसेवाः, शिक्षा एवञ्च आजीविकासुरक्षाप्रदानं लैङ्गिकसमता अपि च निर्धनानां सम्माननम् इति एवंविधानि महासमाह्वानानि अस्माकं लक्ष्याणि भविष्यन्ति । एतानि इतोऽपि महाकार्याणि भविष्यन्ति ।

सारांशः

भवन्तः अस्मिन् अध्याये ज्ञातवन्तः यत् निर्धनतायाः अनेके आयामाः सन्ति । सामान्यतः निर्धनतायाः मापनं निर्धनता-रेखायाः अवधारणाद्वारा क्रियते । अस्याः अवधारणायाः द्वारा वयं निर्धनतायां मुख्यवैश्विक-राष्ट्रिय-प्रवृत्तीनां विश्लेषणं कृतवन्तः । परन्तु सद्यस्तनवर्षेषु निर्धनतायाः विश्लेषणं सामाजिकापवर्जन-सदृशीनाम् अनेकनूतनावधारणानां द्वारा समृद्धं जायमानम् अस्ति । अनेन एव प्रकारेण समाह्वानानि वर्धमानानि सन्ति यतो हि विद्वज्जनाः अस्याः अवधारणायाः मानवनिर्धनतायां विस्तारं कुर्वन्तः सन्ति ।

अभ्यासः

1. भारते निर्धनतारेखायाः आकलनं कथं क्रियते ?
2. किं भवन्तः अवगच्छन्ति यत् निर्धनताकलनस्य वर्तमानविधिः उचितः अस्ति ?
3. भारते १९७३तः निर्धनतायाः प्रवृत्तीनां चर्चां कुर्वन्तु ?
4. भारते निर्धनतायाम् अन्ताराज्यीयाः असमानताः अधिकृत्य एकं विवरणं प्रस्तुवन्तु ?
5. तेषां सामाजिकार्थिक-समूहानाम् अभिज्ञानं कुर्वन्तु ये भारते निर्धनतायाः समक्षं निरुपायाः सन्ति ?
6. भारते अन्ताराज्यीयनिर्धनतायां विभिन्नतायाः कारणानि ज्ञापयन्तु ।
7. वैश्विकनिर्धनतायाः प्रवृत्तीनां चर्चां कुर्वन्तु ।
8. निर्धनतोन्मूलनस्य वर्तमानशासनिकरणनीतेः चर्चां कुर्वन्तु ।
9. निम्नलिखितप्रश्नानाम् उत्तराणि सङ्क्षेपेण यच्छन्तु --
   (क) मानवनिर्धनतया भवतां कः अभिप्रायः अस्ति ?
   (ख) निर्धनेषु अपि सर्वाधिकः निर्धनः कः अस्ति ?
   (ग) राष्ट्रियग्रामीणवृत्तिप्रतिभूः २००५ इति अधिनियमस्य मुख्यविशेषताः काः सन्ति ?

सन्दर्भाः

डेटन,ऐंगस-एंड-बैलेरी,कालेज (सं.),2005, द ग्रेट इण्डियन-पावर्टी-डिबेट, मैकमिलन-इण्डिया-लिमिटेड, नवदेहली ।

इकोनॉमिक-सर्वेक्षणं 2002-3, चैप्टर-ऑन-सोशल-सेक्टर्सस (ऑनलाइनवेब)एचटीटीपी/इण्डियाबजट, एनआइसी, आईएन/ईएस,2002-03,सोशलएच.टी.एम,मिनिस्ट्री,ऑफ-फाइनैंस, गवर्नमेंट आफ इण्डिया, नवदेहली ।

इकोनामिकसर्वेक्षणम् 2004-05,चैप्टर आन सोशल सेक्टर्स, [ऑनलाइन वेब],यूआरएल – एचटीटीपी/इण्ड़ियाव्ययविरणम्, एनआईसी, आईएन/ईएस 2004-05,सामाजिकम् एच.टी.एम.निमिस्ट्री ऑफ फाइनैंस,गवर्मेंट ऑफ इण्डिया, नवदेहली ।

मिडटर्म-एप्रेजल-ऑफ द टेन्थ फाइव ईयर प्लान 2002-07, द्वितीयः अध्यायः – 7, पॉवर्टी एलीवेशन इन रूरल इण्डिया, स्ट्रेटजी एंड प्रोग्राम्स, (ऑनलाइन) ।

वेब] एच.टीटीपी / डब्ल्यूडब्ल्यूडब्ल्यू, योजनायोगः,एनआईसीआईएन/प्लान्स/प्लानरिल/फाइवईयर/टेन्थ,वाल्यूम-2/वी-2 सीएच-3-2पीडीएफ,योजनायोगः, नवदेहली ।

वर्ल्ड-डेवलपमेंट-रिपोर्ट 2000-01,अटेकिंगपावर्टी,द-वर्ल्ड-वैंक, ऑक्सफोर्ड-विश्वविद्यालय-प्रकाशनम्,नवदेहली ।

पाणिग्रहि-अरविन्द-एण्ड-विशाल-मोरे 'पोवर्टी' वाइ-सोशल-रिलियियस-एण्ड-इकोनॉमिक-ग्रुप्स-इन-इण्डिया-एण्ड-इट्स-लार्जेस्ट-स्टेट, वर्किंग-पेपर.नं.2013-14,प्रोग्राम-आन-इण्डियन-इकोनॉमिक-पोलिसीज,कोलम्बिया-युनिवर्सिटी ।

4
अध्यायः

भारते खाद्य-सुरक्षा

अवलोकनम्

सर्वेषां जनानां कृते भोजनस्य उपलब्धता, भोजनस्य व्याप्तिः तस्य प्राप्तेः सामर्थ्यं च इति खाद्य-सुरक्षायाः अर्थः अस्ति । यदा अपि अन्नोत्पादनस्य अन्नवितरणस्य वा समस्या उत्पद्यते तदा इयं समस्या निर्धनकुटुम्बान् सहजतया एव सर्वाधिकं प्रभावयति । खाद्य-सुरक्षा **सार्वजनिक-वितरणप्रणालीम्, शासकीय-सतर्कताम् अथ** च **खाद्य-सुरक्षायाः आपत्-स्थितौ** शासनद्वारा कृतं कार्याचरणम् आश्रयति ।

खाद्यसुरक्षायाः कः अर्थः अस्ति ?

जीवनार्थं भोजनं तावद् एव आवश्यकम् अस्ति यावान् आवश्यकः श्वास-ग्रहणाय वायुः अस्ति । परन्तु केवलं प्रातः सायं रोटिका उपलब्धा भवेत् इत्येव खाद्य-सुरक्षायाः अभिप्रायः नास्ति । अपितु ततोऽपि किमपि अधिकम् अस्ति । खाद्य-सुरक्षायाः निम्नलिखिताः आयामाः सन्ति -

(क) खाद्योपलब्धतया तात्पर्यं देशे खाद्योत्पादनेन, खाद्यायातेन अथ च शासनिकान्नभाण्डारेषु गतवर्षाणां सङ्गृहीतेन सञ्चयेन अस्ति ।

(ख) खाद्य-व्याप्तिः इत्युक्ते एकैकः जनः खाद्यं प्राप्नुयाद् इति ।

(ग) सामर्थ्यम् इत्युक्ते जनानां पार्श्वे तेषां भोजनस्य आवश्यकताः पूरयितुं पर्याप्तं पौष्टिकं च भोजनं क्रेतुं धनस्य उपलब्धता भवेत्। कस्मिंश्चित् देशे खाद्य-सुरक्षा तदैव सुनिश्चिता भवति यदा (1) सर्वेषां जनानां कृते पर्याप्त-खाद्यम् उपलब्धं भवेत् (2) सर्वेषां जनानां पार्श्वे स्वीकार्य-गुणवत्तायाः खाद्य-पदार्थान् क्रेतुं क्षमता भवेत् (3) खाद्योपलब्धतायां कोऽपि विघ्नः न भवेत् ।

खाद्यसुरक्षा किमर्थम् ?

समाजस्य अधिकतर-वर्गः प्रतिसमयं खाद्यस्य असुरक्षया ग्रस्तः भवितुं शक्नोति परन्तु यदा देशः भूकम्पः दुर्भिक्षं जलौघः सुनामी एवञ्च सस्यनाशात् उत्पन्नः अकालः इत्यादिभिः राष्ट्रियापद्भिः ग्रस्तः भवति तदा निर्धनतारेखातः उपरि वर्तमानाः जनाः अपि खाद्यस्य असुरक्षया ग्रस्ताः भवितुं शक्नुवन्ति ।

१९७०तमदशके 'आधारिक-खाद्य-पदार्थानां सदैव पर्याप्तम् उपलब्धता' (संयुक्तराष्ट्रम् १९७५) इति खाद्य-सुरक्षायाः अर्थः आसीत् । अमर्त्यसेनः खाद्य-सुरक्षायाम् एकम् अन्यम् आयामं योजितवान् एवञ्च हकदारी इत्येतेषाम् आधारेण खाद्यं यावद् प्राप्तेः सबलं प्रतिपादनं कृतवान् । हकदारी इत्युक्ते राज्यद्वारा अथवा सामाजिकरूपेण याः अन्यपूर्तयः उपलब्धाः कारिताः सन्ति ताभिः पूर्तिभिः सहैव तैः वस्तुभिः अस्ति येषाम् उत्पादनं विनिमयः च आपणे कयाचित् व्यक्त्या कर्तुं शक्यते । तदनुसारं खाद्य-सुरक्षायाः अर्थे बहुपरिवर्तनं जातम् अस्ति । १९९५तमवर्षस्य विश्व-खाद्य-शिखर-सम्मेलने इयं घोषणा कृता यत् "वैयक्तिक-पारिवारिक-क्षेत्रीय-राष्ट्रिय-वैश्विकस्तरेषु खाद्य-सुरक्षायाः अस्तित्वं तदैव अस्ति यदा सक्रियं स्वस्थं च जीवनं जीवितुम् आहारसम्बद्धाः आवश्यकताः एवञ्च खाद्य-पदार्थान् पूरयितुं पर्याप्तं सुरक्षितम् एवञ्च पौष्टिकं खाद्यं यावद् सर्वेषां जनानां भौतिकी आर्थिकी च व्याप्तिः सदैव भवेत्" (खाद्य-कृषिसङ्घटनम् १९९६, पृष्ठसंख्या ३) । एतदतिरिक्तं घोषणायाम् एतदपि स्वीकृतम् अस्ति यत् "खाद्यं यावद् व्याप्तेः वर्धनं भवेत् इत्येतदर्थं निर्धनतायाः उन्मूलनम् आवश्यकम् अस्ति" ।

कस्याश्चित् आपदः समये खाद्य-सुरक्षा कथं प्रभाविता भवति ? दुर्भिक्षसदृश्याः कस्याश्चित् प्राकृतिकापदः कारणात् खाद्यान्नस्य समग्रोत्पादने न्यूनता जायते । एतत्-प्रभाविते क्षेत्रे खाद्यस्य न्यूनता जायते । खाद्य-न्यूनतायाः कारणात् मूल्यानि वर्धन्ते । केचन जनाः उच्चमूल्येषु सत्सु खाद्य-पदार्थान् न क्रेतुं शक्नुवन्ति । यदि इयम् आपद् अधिक-विस्तृत-क्षेत्रे आगच्छति अथवा चिरकालं यावद् तिष्ठति तर्हि क्षुदामृत्योः स्थितिः भवितुं शक्नोति । व्यापक-क्षुदामृत्योः कारणात् दुर्भिक्षस्थितिः भवितुं शक्नोति ।

दूषितजलस्य अथवा सन्दूषितभोजनस्य प्रयोगेण महामारीभ्यः एवञ्च दुर्भिक्षात् उत्पन्नात् दौर्बल्यात् रोगप्रतिरोधिक्षमतायां न्यूनता जायते इत्यतः दुर्भिक्षावधौ बृहति स्तरे जनाः मृत्युं प्राप्नुवन्ति ।

१९४३तमे वर्षे भारतस्य बङ्गाले महाभयानकं दुर्भिक्षं दुरापन्नम् आसीत् । अस्मिन् दुर्भिक्षे बङ्गालप्रान्ते त्रिंशल्लक्षात् अधिकाः जनाः मृत्युं गताः ।

किं भवन्तः जानन्ति यत् बङ्गालस्य दुर्भिक्षात् के जनाः सर्वाधिकं प्रभाविताः अभवन् ? तण्डुलस्य मूल्येषु प्रभूतवृद्धिः अभवत् इत्यतः कृषिश्रमिकाः, धीवराः, परिवहनकर्मिणः अन्ये च अनियमित-श्रमिकाः सर्वाधिकं प्रभाविताः अभवन् । अस्मात् दुर्भिक्षात् सर्वाधिकं ते जनाः एव मृताः ।

सारणी ४.१ बङ्गालप्रान्ते तण्डुलस्य उत्पादनम्

वर्षम्	उत्पादनम् (लक्षटनमितौ)	आयातः (लक्षटनमितौ)	निर्यातः (लक्षटनमितौ)	समग्रोपलब्धता (लक्षटनमितौ)
१९३८	८५	-	-	८५
१९३९	७९	०४	-	८३
१९४०	८२	०३	-	८५
१९४१	६८	०२	-	७०
१९४२	९३	-	०१	९२
१९४३	७६	०३	-	७९

स्रोतः सेनः, ए.के., १९८३, पृष्ठसंख्या ६१ (अस्य अध्यायस्य सन्दर्भं पश्यन्तु)

आगच्छन्तु चर्चां कुर्याम

- केचन जनाः कथयन्ति यत् बङ्गाले दुर्भिक्षं तण्डुलस्य न्यूनतायाः कारणात् अभवत् । ४.१सारण्याः अध्ययनं कुर्वन्तु ततः ज्ञापयन्तु यत् भवन्तः अनेन कथनेन सम्मताः सन्ति वा ?
- कस्मिन् वर्षे खाद्योपलब्धतायां प्रभूतन्यूनता अभवत् ?



चित्रम् ४.१ सुरक्षाकेन्द्रे क्षुदामृत्युना पीडितजनाः, १९४५



चित्रम् ४.२ १९४५तमवर्षस्य बङ्गालदुर्भिक्षस्य काले पूर्वबङ्गालस्य चटगाँवनाम्नि जनपदे ग्रामं परित्यज्य गच्छन् कश्चन कुटुम्बः ।

अनुशंसितानि कार्याणि

(क) ४.१चित्रे भवन्तः किं पश्यन्ति ?

(ख) प्रथमे चित्रे कतमः आयुर्वगः दृश्यमानः अस्ति ?

(ग) किं भवन्तः कथयितुं शक्नुवन्ति यत् ४.२चित्रे दर्शितः कुटुम्बः निर्धनः अस्ति ? किमर्थम् ?

(घ) किं भवन्तः दुर्भिक्षात् पूर्वं (उभयोः चित्रयोः दर्शितानां) जनानां जीविकायाः स्रोतसां विषये अनुमानं कर्तुं शक्नुवन्ति ?

(ङ) ज्ञातुं प्रयासं कुर्वन्तु यत् कस्मिंश्चित् विश्रान्ति-शिबिरे प्राकृतिकापदा पीडितानां जनानां साहाय्यं केन प्रकारेण क्रियते ?

(च) किं भवद्भिः कदापि एतादृशानां पीडितानां (धन-खाद्य-वस्त्रौषधिरूपेण) साहाय्यं कृतम् अस्ति ?

परियोजनाकार्यम् - भारते दुर्भिक्षसम्बद्धाः सूचनाः एकत्रीकुर्वन्तु ।

भारते बङ्गालसदृशं दुर्भिक्षं पुनः कदापि न दुरापन्नम् । परन्तु अयं चिन्तायाः विषयः अस्ति यत् उडीसाराज्ये कालाहाण्डी-काशीपुरसदृशेषु स्थानेषु अद्यापि दुर्भिक्ष-सदृश्यः दशाः अनेकवर्षेभ्यः व्याप्ताः सन्ति । एतद् अपि संसूच्यते यत् तत्र क्षुदाकारणात् केचन जनाः मृत्युम् अपि प्राप्ताः । सद्यस्तनेषु केषुचिद् वर्षेषु राजस्थानस्य बारनजनपदे झारखण्डस्य पालामुजनपदे तथा च अन्यसुदूरवर्ति-क्षेत्रेषु क्षुदाकारणात् जनाः मृताः इति सूचना प्राप्ता अस्ति । अतः कस्मिंश्चिद् देशे खाद्य-सुरक्षा आवश्यकी भवति येन हि सदैव खाद्योपलब्धतायाः सुनिश्चयः कारयितुं शक्येत ।

खाद्यदृष्ट्या असुरक्षिताः के सन्ति ?

यद्यपि भारते जनानाम् एकः विशालसमूहः खाद्य-पोषणदृष्ट्या असुरक्षितः अस्ति परन्तु एतेन सर्वाधिकं प्रभावितेषु वर्गेषु निम्नलिखिताः सन्ति --- भूमिहीनाः ये स्वल्पाम् अथवा नगण्यां भूमिम् आश्रयन्ति, पारम्परिक-शिल्पकाराः, पारम्परिकसेवाप्रदातारः, स्वलघूद्योगं कुर्वन्तः श्रमिकाः, निराश्रिताः भिक्षुकाः च । नगरीय-क्षेत्रेषु खाद्यदृष्ट्या ते कुटुम्बाः असुरक्षिताः सन्ति येषां कार्यकर्तृसदस्याः प्रायः नूतनवेतन-व्यवसायेषु एवञ्च अनियत-श्रमापणे कार्यं कुर्वन्ति । एते कर्मकराः अधिकांशतः ऋतुकार्येषु संलग्नाः सन्ति । एतेभ्यः एतावत् न्यूनं वेतनं प्रदीयते यत् ते जीवितुम् एव शक्नुवन्ति ।

रामेशस्य कथा

रामेशः रायपुरग्रामे कृषि-क्षेत्रके अनियतकृषि-क्षेत्रके अनियतकृषि-श्रमिकरूपेण कार्यं करोति । तस्य ज्येष्ठः पुत्रः सोमः दशवर्षीयः अस्ति । सः अपि ग्रामप्रमुखस्य सत्पालसिंहस्य पशूनां पालकरूपेण कार्यं करोति । सोमः ग्रामप्रमुखस्य गृहे आवर्षं कार्यं करोति । सोमः एतस्य कार्यस्य कृते केवलम् एकसहस्रं रूप्यकाणि प्राप्नोति । रमेशस्य त्रयः अन्ये पुत्राः सन्ति द्वे च पुत्र्यौ स्तः । परन्तु इदानीं तेषां वयः स्वल्पम् अस्ति अतः ते कृषिक्षेत्रे कार्यं न कर्तुं शक्नुवन्ति । रमेशस्य पत्नी सुवर्णा अपि पशूनां सम्मार्जनस्य एवञ्च गोमयापसारणस्य (अंशकालिकरूपेण) कार्यं करोति । स्वीयदैनिककार्यनिमित्तं सा अर्धकिलोलीटरमितं दुग्धम् एवं शाकैः सह किञ्चित् पक्वं भोजनं प्राप्नोति । एतदतिरिक्तं व्यस्तऋतौ सा स्वभर्त्रा सह कृषिक्षेत्रे कार्यं करोति तेन तयोः आयः वर्धते । कृषिः एकम् ऋतुकालिकं कार्यम् अस्ति । रमेशः केवलं वपनसमये पादपरोपणसमये सस्यकर्तनसमये च कार्यं प्राप्नोति । सस्यसिद्धिम् एवञ्च सस्यपाकं यावद् मासचतुष्टयस्य अवधौ सः अवृत्तिकः तिष्ठति । तदा सः अन्येषां कार्याणाम् अन्वेषणं करोति । यदा कदाचित् सः इष्टिकानिर्माणशालायाम् अथवा ग्रामे प्रवर्तमानेषु कार्येषु कार्यं प्राप्नोति । रमेशः एतैः निजप्रयासैः रोकधनरूपेण अथवा वस्तुरूपेण एतावद् अर्जयति येन स्वकुटुम्बस्य कृते समयद्वयस्य रोटिकायाः व्यवस्थार्थम् आवश्यकवस्तूनां प्रबन्धनं कर्तुं शक्नुयात् । अन्ततः यदा सः कुत्रापि कार्यं प्राप्तुं विफलीभवति तदा सः तस्य च कुटुम्बः वस्तुतः काठिन्यानि सम्मुखीकुरुतः । यदा कदा तु तस्य बालैः बुभुक्षितोदरैः एव शयनं करणीयं भवति । कुटुम्बः दुग्धं शाकं च भोजनेन सह नियमितरूपेण न लभते । कृषिः ऋतुकालिकं कार्यम् अस्ति इत्यतः रमेशः स्वीयावृत्तेः मासचतुष्टये खाद्य-दृष्ट्या असुरक्षितः तिष्ठति ।

आगच्छन्तु चर्चां कुर्याम

- कृषिः एकम् ऋतुकालिकं कार्यं किमर्थम् अस्ति ?
- रमेशः वर्षस्य मासचतुष्टयं यावद् अवृत्तिकः किमर्थं तिष्ठति ?
- यदा रमेशः अवृत्तिकः तिष्ठति तदा सः किं करोति ?
- रमेशस्य कुटुम्बे पूरकम् आयं कः प्रददाति ?
- यदा रमेशः किमपि कार्यं प्राप्तुं विफलीभवति तदा सः काठिन्यं किमर्थं सम्मुखीकरोति ?
- रमेशः खाद्य-दृष्ट्या कदा असुरक्षितः तिष्ठति ?

अहमदस्य कथा

अहमदः बङ्गलूरुमध्ये रिक्शायानं चालयति। सः स्वीयैः त्रीभिः भ्रातृभिः द्वाभ्यां भगिनीभ्याम् एवञ्च वृद्धमातापितृभ्यां सह झुमरीतलैयातः आगतः अस्ति। सः कस्मिंश्चिद् कुटिरे वसति। तस्य कुटुम्बस्य समस्तसदस्यानां पालन-पोषणं रिक्शाचालनद्वारा जायमानं दैनिकम् आयम् आश्रयति । अन्ततः तस्य वृत्तिः सुरक्षिता नास्ति। तस्य आयः प्रतिदिनं वृद्धिं न्यूनतां च गच्छति। यदा कदा सः एतावत् अर्जयति यत् दैनिकावश्यकतायाः समस्तानि वस्तूनि क्रीत्वा स्वीयात् आयात् किञ्चित् संरक्षति। अन्यदिनेषु सः काठिन्येन तावद् एव अर्जयितुं सफलीभवति येन सः दैनिकावश्यकतायाः वस्तूनि क्रेतुं शक्नोति। सौभाग्यवशाद् अहमदः एकं पीतपत्रं प्राप्तवान् अस्ति। एतत् पत्रं निर्धनरेखातः अधोवर्तिनां जनानां पी.डी.एस.पत्रम् अस्ति । अनेन पत्रेण अहमदः स्वीयदैनिकावश्यकतायाः उपभोगार्थं पर्याप्तमात्रायां गोधूमं तण्डुलं शर्करां मृत्तिकातैलं च प्राप्नोति । सः एतानि वस्तूनि विपणिमूल्यानाम् अर्धमूल्यैः प्राप्नोति। सः स्वीयं मासिकं भाण्डारं तस्मिन् विशेष-दिवसे क्रीणाति यस्मिन् दिवसे आपणः निर्धनतारेखायाः अधोवर्तिजनानां कृते उद्घटितः भवति। अनेन प्रकारेण अहमदः स्वस्य अनेन अपर्याप्तायेन स्वीयविशाल-कुटुम्बस्य पालन-पोषणं कुर्वन् अस्ति। अस्मिन् कुटुम्बे अहमदः एकाकी धनार्जकः सदस्यः अस्ति।

आगच्छन्तु चर्चां कुर्याम

- किं रिक्शाचालनेन अहमदः नियमितम् आयं प्राप्नोति ?
- यद्यपि रिक्शाचालनेन स्वल्पः आयः भवति तथापि पीतपत्रेण अहमदः स्वस्य कुटुम्बस्य पालन-पोषणे कथं साहाय्यं लभते ?
- रमेशः खाद्यदृष्ट्या कदा असुरक्षितः भवति ?

खाद्य-पदार्थानां क्रयणस्य असमर्थतया सहैव सामाजिक-संरचना अपि खाद्यदृष्ट्या असुरक्षायां भूमिकां निर्वहति । अनुसूचितजाति-अनुसूचितजनजाति-अन्यपश्चवर्तिजातीनां केषाञ्चन वर्गाणां (एतासु निम्नजातयः) भूमिवर्गः निर्बलः भवति अथवा तेषां भूमेः उत्पादकता बहुन्यूना भवति। ते खाद्यदृष्ट्या शीघ्रम् असुरक्षिताः जायन्ते। ते जनाः ये प्राकृतिकापद्भिः प्रभाविताः सन्ति अथ च यैः कार्यान्वेषणे बहिः गन्तव्यं भवति, खाद्यदृष्ट्या सर्वाधिकम् असुरक्षिताः भवन्ति । कुपोषणात् सर्वाधिकं महिलाः प्रभाविताः भवन्ति। कुपोषणं गम्भीरचिन्तायाः विषयः अस्ति यतो हि अनेन अजन्मबालकानां कृते कुपोषणस्य सङ्कटः भवति। खाद्यासुरक्षया ग्रस्तायाः जनतायाः विशालः भागः गर्भवतीनां महिलानां स्तनपानं कारयन्तीनां महिलानां तथा च पञ्चवर्षोनवयोबालानां रूपेण अस्ति।

राष्ट्रिय-स्वास्थ्य-पारिवारिक-सर्वेक्षणम् (N.H.F.S) १९९८-९९ इत्यस्य अनुसारं भारते एतादृशीनां महिलानां बालानां च सङ्ख्या प्रायः एकादशकोटिमिता अस्ति।

आर्थिकरूपेण पश्चवर्तिराज्यानि यत्र निर्धना अधिकाः सन्ति, आदिवासि-सुदूरक्षेत्राणि एवञ्च प्राकृतिकापद्भिः वारं वारं प्रभावितानि क्षेत्राणि देशस्य कानिचन क्षेत्राणि सन्ति यत्र खाद्यदृष्ट्या असुरक्षितानां जनानां सङ्ख्या आनुपातिकरूपेण बह्वधिका अस्ति। वस्तुतः उत्तर-प्रदेशे (दक्षिण-पूर्वक्षेत्रेषु), बिहार-झारखण्डोडिसा-पश्चिमबङ्गाल-छत्तीसगढ़-मध्यप्रदेश-महाराष्ट्राणां केषुचिद् भागेषु खाद्यदृष्ट्या असुरक्षितानां जनानां सर्वाधिकसंख्या अस्ति।

क्षुदामृत्युः द्वितीयः पक्षः अस्ति यः खाद्यदृशा असुरक्षां सङ्केतयति। क्षुदामृत्युः निर्धनतायाः अभिव्यक्तिमात्रम् एव नास्ति अपितु एतस्मात् निर्धनता जायते । अनेन प्रकारेण खाद्यदृष्ट्या सुरक्षायां जातायां सत्यां वर्तमाने क्षुदामृत्युः समाप्तिं गच्छति अपि च भविष्ये क्षुदामृत्योः सङ्कटः न्यूनः जायते । क्षुदामृत्योः दीर्घकालिकाः ऋतुकालिकाः च आयामाः भवन्ति। दीर्घकालिकः क्षुदामृत्युः मात्राम् अथवा गुणवत्ताम् आधारीकृत्य अपर्याप्ताहारस्य ग्रहणात् भवति। निर्धनजनानाम् आयः अतीव न्यूनः भवति इत्यतः अपि च ते जीवितुं खाद्यपदार्थान् क्रेतुम् अक्षमाः भवन्ति इत्यतः ते दीर्घकालिक-क्षुदया ग्रस्ताः भवन्ति । ऋतुकालिकः क्षुदामृत्युः सस्योत्पादनेन सस्यकर्तनेन च सम्बद्धः भवति । ग्रामीण-क्षेत्रेषु कृषि-क्रियाणां प्रकृतिः ऋतुशीला भवति अथ च नगरीय-क्षेत्रेषु

श्रमः अनियमितः भवति इति कारणद्वयात् ऋतुकालिकः क्षुदामृत्युः भवति । यथा - वर्षऋतौ अनियत-निर्माण-श्रमिकः न्यूनं कार्यं प्राप्नोति । एतादृशः क्षुदामृत्युः तदा भवति यदा कापि व्यक्तिः सम्पूर्णवर्षे किमपि कार्यं प्राप्तुम् अक्षमः तिष्ठति ।

४.२सारण्यां दर्शितम् अस्ति यत् ऋतुकालिक-मृत्योः दीर्घकालिक-मृत्योः च प्रतिशते अपचयः सञ्जातः अस्ति ।

४.२सारणी भारते क्षुदामृत्युना ग्रस्तानां कुटुम्बानां प्रतिशतम्

वर्षम्	क्षुदामृत्योः प्रकाराः		
	ऋतुकालिकः क्षुदामृत्युः	दीर्घकालिकः क्षुदामृत्युः	आहत्य
ग्रामीणाः			
१९८३	१६.२	२.३	१८.५
१९९३-९४	४.२	०.९	५.१
१९९९-२०००	२.६	०.७	३.३
नगरीयाः			
१९८३	५.६	०.८	६.४
१९९३-९४	१.१	०.५	१.६
१९९९-२०००	०.६	०.३	०.९

स्रोतः सागर२००४, विद्या (अस्य अध्यायस्य सन्दर्भं पश्यन्तु)

स्वतन्त्रतानन्तरं खाद्यान्नदृष्ट्या आत्माश्रयता भारतस्य लक्ष्यं वर्तते ।

स्वतन्त्रतानन्तरं भारतस्य नीति-निर्मातृभिः खाद्यान्नेषु आत्माश्रय-प्राप्तेः सर्वे उपायाः कृताः । भारतेन कृषिक्षेत्रे एका नूतना नीतिः अङ्गीकृता । अस्याः नीतेः परिणतिः हरितक्रान्तौ अभवत् विशेषतः गोधूम-तण्डुलयोः उत्पादने ।

जुलैमासे १९६८तमे वर्षे तात्कालिकप्रधानमन्त्रिणा इन्दिरागान्धिवर्यया 'गोधूम-क्रान्तिः' इति शीर्षकेण एकं विशेषप्रैषमुद्राङ्कं प्रवर्तितं ततः कृषि-क्षेत्रके हरितक्रान्तेः प्रभावशालि-प्रगतिः आधिकारिक-रूपेण अङ्किता । गोधूमस्य सफलतानन्तरं तण्डुल-क्षेत्रे अस्याः सफलतायाः पुनरावृत्तिः अभवत् । अन्ततः अन्नस्य उत्पादने वृद्धिः समानुपातिकी न आसीत् । उत्तर-प्रदेशे पञ्जाबे च सर्वाधिका वृद्धिः अङ्किता । एतयोः द्वयोः राज्ययोः उत्पादनं वर्धित्वा २०१२-१३तमेवर्षे

चित्रम् ४.३ पञ्जाबस्य कञ्चन कृषकः एच.वाई.वी. इति श्रेणीणां गोधूमस्य कस्यचित् क्षेत्रस्य पुरतः, यत् हरितक्रान्तिः आश्रयति ।

७८.९१कोटिटनमितम् अभवत् यद् हि सर्वाधिकोन्नतः कीर्तिमानः आसीत् । २०१२-१३तमेवर्षे उत्तराखण्डे झारखण्डे असमे तमिलनाडौ च उत्पादनस्य स्तरः पश्चीभूतः । अपरतः पश्चिमबङ्गाले उत्तरप्रदेशे च तण्डुलस्य उत्पादने उल्लेखनीया वृद्धिः अभवत् ।

अनुशंसिताः क्रियाः

- निकटवर्तिनः कस्यचित् ग्रामस्य कानिचन क्षेत्राणि गच्छन्तु अथ च कृषकैः उत्पादितानां खाद्य-सस्यानां विवरणम् एकत्रीकुर्वन्तु ।

भारते खाद्य-सुरक्षा

सप्ततितम-दशकस्य प्रारम्भे हरित-क्रान्तेः आगमनानन्तरम् ऋतोः विपरीत-दशासु अपि देशे दुर्भिक्षं न दुरापन्नम् ।

अशेषे देशे उत्पाद्यमानानां विविध-सस्यानां कारणात् भारतं विगत-त्रिंशद्-वर्षेषु खाद्यान्न-क्षेत्रे आत्माश्रितं जातम् अस्ति । शासनद्वारा अवधानपूर्वकं सज्जीकृतायाः खाद्य-सुरक्षाव्यवस्थायाः कारणात् देशे (प्रतिकूलऋतु-स्थितिषु सतीषु अपि अथवा अन्यस्माद् कस्माच्चित् कारणात्) अन्नस्य उपलब्धता इतोऽपि सुनिश्चिता अभवत् । अस्याः व्यवस्थायाः घटकद्वयम् अस्ति (क) भण्डारणम् (ख) सार्वजनिक-वितरणप्रणाली ।

आरेख: ४.१ भारते अन्नस्य उत्पादनम् (कोटिटनमानेन)



स्रोत: आर्थिककसर्वेक्षणम् २०११-१२,२०१३-१४, एग्रीकल्चरल स्टैटिस्टिक्स एट ए ग्लैंस्, २०१४

आगच्छन्तु चर्चां कुर्याम

४.१ आरेखस्य अध्ययनं कुर्वन्तु अथ च निम्नलिखितप्रश्नानाम् उत्तराणि ददतु

- अस्माकं देशे कस्मिन् वर्षे अन्नस्य उत्पादनं प्रतिवर्षं द्विकोटिटनमितात् अधिकम् अभवत् ?
- भारते कस्मिन् दशके अन्नस्य उत्पादने सर्वाधिका दशकीया वृद्धिः अभवत् ?
- किं २०००-०1तमे वर्षे भारते उत्पादने वृद्धिः स्थायिनी अस्ति ?

भण्डारणम् (बफ़रस्टॉक) किम् अस्ति ?

भण्डारणं **भारतीय-खाद्यनिगमस्य** माध्यमेन शासनद्वारा अधिप्राप्तस्य अन्नस्य गोधूमस्य तण्डुलस्य च भण्डारणम् अस्ति। भारतीय-खाद्यनिगमः अधिशेषोत्पादन-राज्येषु कृषकेभ्यः गोधूमं तण्डुलंचक्रीणाति।कृषकेभ्यःतेषांसस्यानांकृतेपूर्वघोषित-मूल्यानि प्रदीयन्ते। एतत् मूल्यं **न्यूनतम-समर्थित-मूल्यम्** इति कथ्यते। एतेषां सस्यानाम् उत्पादनम् अधिकाधिकं भवेद् इति उद्देश्येन वपनऋतोः पूर्वं शासनं न्यूनतम-समर्थितमूल्यस्य घोषणां करोति। क्रीतानि अन्नानि खाद्य-भाण्डागारेषु स्थाप्यन्ते। किं भवन्तः जानन्ति यत् शासनं भण्डारणं किमर्थं करोति ? येषु क्षेत्रेषु न्यूनता वर्तते तत्र एवञ्च समाजस्य निर्धन-वर्गेषु विपणिमूल्यात् न्यूनेन मूल्येन अन्नस्य वितरणं भवेत् इत्येतदर्थम् एतत् कार्यं क्रियते। एतत् मूल्यं **निर्गम-मूल्यम्** अपि कथ्यते। एतत् प्रतिकूलऋतौ अथवा आपत्काले अन्नस्य न्यूनतायाः समस्या-समाधाने साहाय्यं करोति।

सार्वजनिक-वितरणप्रणाली का अस्ति ?

शासनं भारतीय-खाद्यनिगमेन अधिप्राप्तस्य अन्नस्य विनियमित-खाद्यापणानां माध्यमेन समाजस्य निर्धन-वर्गेभ्यः वितरणं कारयति। एतत्सार्वजनिक-वितरणप्रणाली(पी.डी.एस.)इतिकथ्यते।अधुना अधिकतर-क्षेत्रेषु ग्रामेषु उपनगरेषु नगरेषु च खाद्यापणाः सन्ति। अशेषे देशे प्रायशः ५.५लक्षं खाद्यापणाः सन्ति। एते खाद्यापणाः **उचितमूल्यस्य आपणाः** इति अपि कथ्यन्ते। एषु आपणेषु शर्करा खाद्यान्नम् अथ च भोजनपाकाय मृत्तिकातैलम् अपि संगृह्यन्ते। एतत् सर्वं विपणिमूल्यात् न्यूनेन मूल्येन जनेभ्यः विक्रीयते। खाद्यपत्रधारी कोऽपि कुटुम्बः प्रतिमासम् एतेषां वस्तूनाम् एकाम् अनुबन्धित-मात्रां (यथा ३५किलोग्राममितम् अन्नम्, ५लीटरमितं मृत्तिकातैलम्, ५किलोग्राममिता शर्करा इत्यादि) निकटवर्ति-खाद्यापणात् क्रेतुं शक्नोति।

खाद्यपत्राणां त्रयः प्रकाराः सन्ति - (क) निर्धनेषु अपि निर्धन-जनानां कृते अन्त्योदय-पत्राणि (ख) निर्धनता-रेखायाः अधोवर्तिजनानां कृते बी पी एल पत्राणि (ग) अन्येषां जनानां कृते ए पी एल पत्राणि ।

अनुशंसिताः क्रियाः

- निजक्षेत्रस्य खाद्यापणं गच्छन्तु ततश्च निम्नलिखितं विवरणं प्राप्नुवन्तु -
  १. खाद्यापणः कदा उद्घटितः भवति ?
  २. खाद्यापणे किं किं वस्तु विक्रीयते ?
  ३. खाद्यापणस्य शर्करायाः तण्डुलस्य (निर्धनतारेखायाः अधोवर्तिजनेभ्यः प्रदीयमानस्य) मूल्यानां तुलनां कस्यचित् अन्यसामान्यापणस्य मूल्यैः सह कुर्वन्तु ।
- ज्ञातुं प्रयासं कुर्वन्तु -
  १. किं भवतां पार्श्वे खाद्यपत्रम् अस्ति ?
  २. अनेन खाद्यपत्रेण भवतां कुटुम्बेन सद्यः एव किं वस्तु क्रीतम् अस्ति ?
  ३. किं तैः काचिदपि समस्या सम्मुखीक्रियते ?
  ४. खाद्यापणाः किमर्थम् आवश्यकाः सन्ति ?

चित्रम् ४.४

भारते खाद्यव्यवस्थायाः शुभारम्भः बङ्गाल-दुर्भिक्षस्य पृष्ठभूमौ १९४०तमे दशके अभवत् । हरित-क्रान्तेः पूर्वं प्रभूतखाद्य-सङ्कटः आसीत् इत्यतः षष्टितमे दशके खाद्यप्रणाल्याः पुनर्जीवनं कृतम् । निर्धनतायाः उच्च-स्तरान् मनसि निधाय सप्ततितमस्य दशकस्य मध्ये एन.एस.एस.ओ. इत्यस्य आख्यानुसारं खाद्य-सम्बद्धाः त्रयः महत्त्वपूर्णाः अन्तःक्षेप-कार्यक्रमाः प्रारब्धाः । **सार्वजनिक-वितरण-प्रणाली** (या पूर्वमेव आसीत् परन्तु सा इतोऽपि दृढीकृता), **एकीकृत-बालविकास-सेवाः** (आई. सी.डी.एस., याः प्रायोगिकाधारेण १९७५तमे वर्षे प्रारब्धाः) अथ च **कार्यनिमित्तम् अन्नम्** (एफ.एफ.डब्ल्यू., १९७७-७८मध्ये प्रारब्धम्) । एतेषु वर्षेषु अनेके नूतनाः कार्यक्रमाः समारब्धाः अपि च कार्यक्रम-चालनस्य वर्धमानान् अनुभवान् आधारीकृत्य अन्येषां कार्यक्रमाणां पुनर्घटनं कृतम् । वर्तमानसमये अनेके **निर्धनतोन्मूलन-कार्यक्रमाः** (पी.ए.पी.) प्रचाल्यमानाः सन्ति । इमे कार्यक्रमाः अधिकतरं ग्रामीण-क्षेत्रेषु प्रचाल्यमानाः सन्ति । एतेषु कार्यक्रमेषु स्पष्टरूपेण घटकं खाद्यम् अपि अस्ति यत्र सार्वजनिक-वितरणप्रणाली, मध्याह्नभोजनम् इत्यादि विशेषरूपेण खाद्यदृष्ट्या सुरक्षायाः कार्यक्रमाः सन्ति । अधिकतराः निर्धनतोन्मूलन-कार्यक्रमाः अपि खाद्य-सुरक्षां वर्धयन्ति । वृत्ति-कार्यक्रमाः निर्धनानाम् आये वृद्धिं कृत्वा खाद्य-सुरक्षायां महत् योगदानं कुर्वन्ति ।

अनुशंसिताः क्रियाविधयः -

शासनपक्षतः प्रारब्धं खाद्यम् आधारीकृत्य प्रवर्तमानानां कार्यक्रमाणां विस्तृत-विवरणम् एकत्रीकुर्वन्तु ।
सङ्केतः - ग्रामीणवेतन-रोजगारकार्यक्रमाः, रोजगार-गारण्टीयोजना, सम्पूर्ण-ग्रामीण-रोजगार-योजना, मध्याह्नभोजनम्, एकीकृतबाल-विकाससेवाः इत्यादयः ।

सार्वजनिक-वितरणप्रणाल्याः वर्तमान-स्थितिः -

खाद्य-सुरक्षा सुनिश्चिता भवेद् इति दिशि सार्वजनिकवितरण-प्रणाली भारतशासनस्य महत्त्वपूर्णः पदक्षेपः अस्ति । प्रारम्भे इयं प्रणाली सर्वेषां कृते आसीत् । निर्धनानाम् अनिर्धनानां च मध्ये कोऽपि भेदः न आसीत् । वर्षान्तरेषु सार्वजनिक-वितरण-प्रणाली इतोऽपि दक्षा अधिकलक्षिता च भवेद् इति उद्देश्येन इयं प्रणाली संशोधिता । १९९२तमे वर्षे देशस्य १७००विकासखण्डेषु

भारतीय-खाद्यसुरक्षाधिनियमः २०१३

भारतीयखाद्यसुरक्षाधिनियमः २०१३ इत्येतदन्तर्गतं खाद्य-पोषणसम्बद्धा सुरक्षा अल्पमूल्यैः सुलभायितुं शक्येत येन हि मानवः गौरवपूर्णं जीवनं जीवितुं शक्नुयात्। एतदभियानान्तर्गतं प्रतिशतं पञ्चसप्ततिमिता ग्रामीण-जनसङ्ख्या एवञ्च प्रतिशतं पञ्चाशन्मिता नगरीय-जनसङ्ख्या योग्यकुटुम्बे वर्गीकृता अस्ति।

संशोधित-सार्वजनिकवितरम-प्रणाली (आर पी डी एस) समारब्धा। दूरवर्तिक्षेत्रेषु पश्चवर्तिक्षेत्रेषु च सार्वजनिक-वितरणप्रणालीद्वारा लाभः भवेद् इति अस्याः प्रणाल्याः उद्देश्यम् आसीत्। १९९७तमवर्षस्य जूनमासे सर्वेषु क्षेत्रेषु निर्धनानां लक्ष्यीकरणस्य सिद्धान्तम् अङ्गीकर्तुं लक्षित-सार्वजनिकवितरण-प्रणाली (टी.पी.डी.एस.) प्रारब्धा। अयं प्रथमः अवसरः आसीत् यदा निर्धनेभ्यः अनिर्धनेभ्यः च विभेदक-मूल्यनीतिः अङ्गीकृता। एतदतिरिक्तं २०००तमे अन्त्योदयान्न-योजना एवञ्च अन्नपूर्णा योजना इति द्वे विशेष-योजने आरब्धे। एतद् योजनाद्वयं क्रमशः निर्धनेषु अपि सर्वाधिकः निर्धनः एवञ्च दीनवरिष्ठ-नागरिकः इत्येतयोः समूहान् आदाय लक्षितं वर्तते। एतयोः द्वयोः योजनयोः सञ्चालनं सार्वजनिक-वितरणप्रणाल्याः वर्तमान-जालतन्त्रेण सह संयोजितम् अस्ति। सार्वजनिक-वितरणप्रणाल्याः कासाञ्चन महत्त्वपूर्ण-विशेषतानां सारांशः ४.३सारण्यां दत्तम् अस्ति।

एतेषु वर्षेषु सार्वजनिक-वितरणप्रणाली मूल्यानां स्थिरीकरणे अथ च यथासामर्थ्यं मूल्यैः खाद्यान्नम् उपभोक्तृभ्यः उपलब्धं भवेद् इति शासनिक-नीतौ सर्वाधिकं प्रभाविसाधनत्वेन सिद्धा अभवत्। अनया देशस्य अन्नस्य अधिशेष-क्षेत्रेभ्यः न्यूनतायुक्तेषु क्षेत्रेषु खाद्य-पूर्तेः माध्यमेन अकाल-दुर्भिक्षयोः व्यापकतायाः अवरोधने

४.३ सारणी - सार्वजनिकवितरण-प्रणाल्याः काश्चन विशेषताः

योजनायाः कार्यम्	आरम्भ-वर्षम्	लक्षितसमूहः	अद्यतनमात्रा	निर्गम-मूल्यम् (रु.प्र.कि.)
सार्वजनिक-वितरण-प्रणाली	१९९२ पर्यन्तम्	सार्वजनिकी	-	गोधूमः २.३४ तण्डुलः -२.८९
संशोधित-सार्वजनिक-वितरण-प्रणाली	१९९२	पश्चवर्तिविकासखण्डाः	२०किलोग्राममितं खाद्यान्नम्	गोधूमः - २.८० तण्डुलः - ३.७७
लक्षित-सार्वजनिक-वितरण-प्रणाली	१९९७	निर्धनाः अनिर्धनाः बी.पी.एल. ए.पी.एल.	३५ किलोग्राममितं खाद्यान्नम्	बी.पी.एल. - गोधूमः - ४.१५ तण्डुलः - ५.६५ ए.पी.एल.- गोधूमः - ६.१० तण्डुलः - ८.३०
अन्त्योदयान्न-योजना	२०००	निर्धनेषु सर्वाधिकाः निर्धनाः	३५ किलोग्राममितं खाद्यान्नम्	गोधूमः - २.०० तण्डुलः - ३.००
अन्नपूर्णा योजना	२०००	दीनवरिष्ठाः नागरिकाः	१० किलोग्राममितं खाद्यान्नम्	निःशुल्कम्
राष्ट्रिय-खाद्य-सुरक्षाधिनियमः	२०१३	योग्यकुटुम्बाः	५ किलोग्राममितं खाद्यान्नम् प्रतिव्यक्ति प्रतिमासम्	गोधूमः - २.०० तण्डुलः - ३.०० अन्नम् - १.००

आलोकः - बी.पी.एल. -- निर्धनतारेखायाः अधः, ए पी एल - निर्धनतारेखायाः उपरि

स्रोतः आर्थिकसर्वेक्षणम्

महत्त्वपूर्ण-भूमिका निर्व्यूढा अस्ति । एतदतिरिक्तं सामान्यतः निर्धन-कुटुम्बानां पक्षे मूल्यानां संशोधनं क्रियमाणम् अवर्तत । न्यूनतम-समर्थित-मूल्यानि अथ च अधिप्राप्तिः इत्येतद्-द्वयेन खाद्यान्नानाम् उत्पादनस्य वृद्धौ योगदानं कृतम् अस्ति तथा च केषुचित् क्षेत्रेषु कृषकेभ्यः आय-सुरक्षा प्रदत्ता अस्ति ।

तथापि सार्वजनिक-वितरणप्रणाल्या अनेकैः आधारैः कट्वालोचना सम्मुखीकृता । अन्नैः पूर्णतः भरितेषु भाण्डागारेषु सत्सु अपि क्षुदामृत्योः घटनाः जायमानाः सन्ति । भारतीय-खाद्यनिगमस्य भाण्डाराणि अन्नैः भरितानि सन्ति । क्वचिद् अन्नं सन्दुष्यति केषुचिद् स्थानेषु च मूषकाः अन्नं खादन्तः सन्ति । अधः दत्तम् ४.२आरेखः २००२तमवर्षं यावद् खाद्यान्नस्य वर्धमानं भाण्डारं दर्शयति ।

आगच्छन्तु चर्चां कुर्याम

४.२आरेखस्य अध्ययनं कुर्वन्तु निम्नलिखितानां प्रश्नानां च उत्तराणि ददतु --

- सद्यस्तने कस्मिन् वर्षे शासनस्य पार्श्वे खाद्यान्नस्य भाण्डारं सर्वाधिकम् आसीत् ?
- भारतीयखाद्य-निगमस्य न्यूनतमः भाण्डार-प्रतिमानं किम् अस्ति ?
- भारतीयखाद्य-निगमस्य भाण्डारेषु खाद्यान्नं पूर्णतः किमर्थं भरितम् अस्ति ?

अन्त्योदयान्न-योजना

अन्त्योदयान्न-योजना दिसम्बरमासे २०००तमे वर्षे प्रारब्धा । अस्याः योजनायाः अन्तर्गतं लक्षित-सार्वजनिकवितरण-प्रणाल्याम् अन्तर्भूतेषु निर्धनतारेखायाः अधोवर्तिकुटुम्बेषु एककोटिजनानाम् अभिज्ञानं कृतम् । सम्बद्ध-राज्यानां ग्रामीण-विकासविभागैः निर्धनता-रेखायाः अधोवर्तिनिर्धन-कुटुम्बानां सर्वेक्षणद्वारा चयनं कृतम् । द्विरूप्यक-प्रतिकिलोग्राममित्या गोधूमः एवञ्च त्रिरूप्यकप्रतिकिलोग्रामस्य अत्यधिकार्थिक-साहाय्यप्राप्त-मित्या प्रत्येकं पात्र-कुटुम्बाय २५किलोग्राममितम् अन्नं सुलभायितम् । अन्नस्य इयं मात्रा २००२तमवर्षस्य अप्रैलमासे २५किलोग्रामतः वर्धयित्वा ३५किलोग्राममिता कृता । २००३तमवर्षस्य जूनमासे एवञ्च २००४तमवर्षस्य अगस्तमासे अनया योजनया सह पञ्चाशत् पञ्चाशत् लक्षम् अतिरिक्ताः निर्धनतारेखायाः अधोवर्ति-कुटुम्बाः द्विवारं संयोजिताः । अनेन अस्यां योजनायां समाविष्टानां कुटुम्बानां सङ्ख्या द्विकोटिमिता जाता ।

साहायिकी (सब्सिडी) नाम सः प्रदीयमानः राशिः यः शासनेन कस्मैचित् उत्पादकाय विपणिमूल्यानाम् अनुपूर्तये दीयते । सहायिकीद्वारा गृहोत्पादकानां कृते उच्चाय-स्थापनापूर्वकम् उपभोक्तृ-मूल्यानि न्यूनीकर्तुं शक्यन्ते ।

आरेखः ४.२ बफ़रस्टॉकस्य स्तरः एवञ्च तण्डुलस्य गोधूमस्य च मानकानि (कोटिटनमानेन)



स्रोतः सैनी श्वेता मार्या कोजिका च (२०१४)

२०१४तमे वर्षे भारतीयखाद्यनिगमस्य पार्श्वे गोधूमस्य तण्डुलस्य च ६५.२कोटिटनमितं भाण्डारम् आसीत् यद् हि न्यूनतम-

भण्डारण-प्रतिमानात् बह्वधिकम् आसीत्। तथापि भण्डारणमिदं प्रतिमानेभ्यः निरन्तरम् उच्चैः अवर्तत । शासनद्वारा प्रारब्धानां विभिन्नयोजनानाम् अधीने खाद्यान्नानां वितरणद्वारा स्थितिः सम्यक् अभवत् । अन्नवितरणेन स्थितौ भद्रता सञ्जाता । अस्मिन् विषये सर्वे सम्मताः सन्ति यत् भण्डारणस्य उच्च-स्तरः अतीव अवाञ्छनीयः अस्ति अपि च एतद् विनाशाय अपि भवति । विशाल-खाद्यसञ्चयस्य भण्डारणं विनाशाय, अन्नस्य गुणवत्तायां ह्रासाय अपि च उच्चसंरक्षण-मूल्यानां कृते उत्तरदायि अस्ति । न्यूनतम-समर्थितमूल्यानां कतिचिद् वर्षाणि यावद् स्थिरीकरणं प्रति गम्भीरतया विचारः करणीयः ।

पञ्जाबः हरियाणा आन्ध्रप्रदेशः इत्येतेषां प्रमुखाणाम् अन्नोत्पादक-राज्यानां पक्षतः कृतस्य बलाघातस्य परिणामतः वर्धित-न्यूनतम-समर्थितमूल्यैः अन्नस्य अधिकं क्रयणं कृतम् । एतदतिरिक्तं यतो हि क्रयणं केषुचित् समृद्ध-क्षेत्रेषु (पञ्जाब-हरियाणा-पश्चिमोत्तरप्रदेश-आन्ध्रप्रदेश-पश्चिमबङ्गालेषु) मुख्यतः गोधूमः तण्डुलः च इति सस्यद्वयं यावद् सीमितम् अस्ति अतः न्यूनतम-समर्थित-मूल्येषु वृद्धेः कारणात् विशेषतया खाद्यान्नानाम् अधिशेष-राज्यानां कृषकाः स्वीयक्षेत्रेषु स्थूलान्नस्य कृषिं समाप्य तण्डुलं गोधूमं च उत्पादयितुं प्रेरिताः । अपरञ्च स्थूलान्नं निर्धनानां प्रमुखं भोजनम् अस्ति । तण्डुल-कृषेः कृते सघन-सेचनेन पर्यावरणे जलस्तरे च न्यूनता अपि जाता अस्ति येन एषु राज्येषु कृषिगत-विकासस्य अस्तित्वाय सङ्कटः उत्पन्नः अस्ति ।

न्यूनतम-समर्थित-मूल्यानां वर्धनात् शासनस्य खाद्यान्न-समादानानुरक्षण-मूल्यं वर्धितम् अस्ति । भारतीयखाद्यनिगमस्य वर्धमानात् परिवहन-मूल्यात् सङ्ग्रहण-मूल्यात् च एतत् इतोऽपि वर्धितम् अस्ति ।

एन.स.एस.ओ. संख्या ५५८ इति आख्यानुसारं ग्रामीणभारते प्रतिव्यक्ति तण्डुलस्य उपभोगः २००४-०५तमवर्षस्य ६.३८किलोग्रामतः व्यवकलितः भूत्वा २०११-१२तमे वर्षे ५.९८किलोग्राममितः अभवत् ।

नगरीयभारते प्रतिव्यक्ति प्रतिमासं तण्डुलस्य उपभोगः ४.७१किलोग्रामतः व्यवकलितः भूत्वा २०११-१२तमे वर्षे ४.४९किलोग्राममितः अभवत् । पी.डी.एस. इत्यस्य तण्डुलस्य प्रतिव्यक्ति उपभोगः २००४-०५तः २०११-१२पर्यन्तं ग्रामीणभारते द्विगुणितः जातः अस्ति । नगरीयभारते प्रतिशतं ६६मितः वर्धितः अस्ति । पी.डी.एस. इत्यस्य गोधूमस्य प्रतिव्यक्ति प्रतिमासम् उपभोगः २००४-०५तः ग्रामीण-नगरीयभारते द्विगुणितः जातः अस्ति ।

पी.डी.एस. वितरकाः अधिकलाभं स्वीकर्तुम् अन्नस्य मुक्तापणेषु विक्रयणम्, खाद्यान्नापणेषु निकृष्टान्नस्य विक्रयणम्, अनियमिततया आपणोद्घाटनम् इत्यादीन् अपचारान् कुर्वन्ति । इयं काचित् महती समस्या जायमाना अस्ति यत् खाद्यान्नापणेषु निकृष्टान्नं विद्यते । एतत् विक्रययोग्यम् अपि न भवति । इयं काचित् महती समस्या सिद्धा जायमाना अस्ति । यदा खाद्यान्नापणाः एतानि अन्नानि विक्रेतुं विफलीभवन्ति तदा भारतीयखाद्यनिगमस्य भाण्डारेषु अन्नस्य विशालसंग्रहः संचितः भवति । सद्यस्तनेषु वर्षेषु अन्यस्मात् कारणात् अपि सार्वजनिक-वितरणप्रणाल्याम् अपचितिः अङ्किता । पूर्वं प्रत्येकं कुटुम्बस्य पार्श्वे निर्धनखाद्यपत्रम् अथवा निर्धनेतरखाद्यपत्रम् आसीत् । अस्मिन् पत्रके तण्डुल-गोधूम-शर्करादीनां वस्तूनां कश्चन निश्चितः राशिः भवति स्म । एतानि वस्तूनि प्रत्येकं कुटुम्बस्य कृते समानमानेन निम्नमूल्येन च विक्रीयन्ते स्म ।

अद्य भवन्तः यानि त्रिविधानि पत्रकाणि एवञ्च मूल्यानां शृङ्खलां पश्यन्ति पूर्वम् एतत् न आसीत् । कुटुम्बानि खाद्यान्नापणेभ्यः

प्रचुरमात्रायाम् अन्नानि क्रेतुं शक्नुवन्ति स्म । आम्, तेषां राशिः निश्चितः आसीत् । एतेषु निम्नायवर्गीय-कुटुम्बानि सम्मिलितानि आसन् येषाम् आयः निर्धनतारेखातः अधोवर्तिनां कुटुम्बानाम् आयात् किञ्चित् एव अधिकः आसीत् । अधुना त्रयाणां भिन्नमूल्यानां टी.पीयडी.एस. इति व्यवस्थायां निर्धनतारेखायाः उपरि विद्यमानं किमपि कुटुम्बं खाद्यान्नापणे बहुन्यूनं मूल्यलाभं प्राप्नोति। ए.पी.एल.पत्रधारक-कुटुम्बानां कृते मूल्यानि प्रायः तावन्ति एव उच्चानि सन्ति यावन्ति मुक्तविपणौ अतः खाद्यान्नापणात् एतेषां वस्तूनां क्रयणाय ते बहुन्यूनं प्रोत्साहनं प्राप्नवन्तः सन्ति।

सहकारिसमितीनां खाद्यसुरक्षायां भूमिका

भारते विशेषेण दक्षिणपश्चिमभागेषु सहकारिसमितयः अपि खाद्यसुरक्षायां काञ्चित् महत्त्वपूर्णभूमिकां निभालयन्ति । सहकारिसमितयः निर्धनजनानां कृते खाद्यान्नस्य विक्रयणाय अल्पमूल्यवताम् आपणानाम् उद्घाटनं कुर्वन्ति । उदाहरणार्थं तमिलनाडौ यावन्तः खाद्यान्नस्य आपणाः सन्ति तेषु प्रायः प्रतिशतं ९४मितानां सहकारिसमितीनां माध्यमेन प्रचाल्यमानाः सन्ति । देहल्यां मदरदुग्धशाला उपभोक्तृभ्यः दिल्लीसर्वकारद्वारा निर्धारितैः नियन्त्रितैः च मूल्यैः दुग्धं शाकं च तीव्रप्रगत्या सुलभायमाना अस्ति । गुजराते दुग्धप्रसंगे दुग्धोत्पादप्रसंगे च अमूलनामिका समितिः सफलसहकारिसमितेः उदाहरणम् अस्ति । अनया देशे श्वेतक्रान्तिः आनीता अस्ति । देशस्य विभिन्नभागेषु कार्यरतानां सहकारिसमितीनाम् इतोऽपि अनेकानि उदाहरणानि सन्ति याभिः समाजस्य विभिन्नवर्गाणां कृते खाद्यसुरक्षा सुनिश्चिता अस्ति।

अनेन एव प्रकारेण महाराष्ट्रे विज्ञानविकास-अकादमी (ए.डी.एस.) इति एतद्-द्वारा विभिन्नक्षेत्रेषु खाद्यान्नकोषाणां स्थापनायै शासनेतरसङ्घटनानाम् अन्तर्जाले सहायता कृता अस्ति। विज्ञानविकास-अकादमी शासनेतरसंघटनानां कृते खाद्यसुरक्षायाः विषयेप्रशिक्षणंक्षमतानिर्माणकार्यक्रमंचसंचालयति।खाद्यान्नकोषाः अधुना शनैः शनैः महाराष्ट्रस्य विभिन्नभागेषु उद्घाट्यमानानि सन्ति। खाद्यान्नकोषाणां स्थापना शासनेतरसंघटनानां माध्यमेन तेषां प्रसारणे एवञ्च खाद्यसुरक्षाप्रसंगे शासनिकनीतेः प्रभावीकरणे विज्ञानविकास-अकादम्याः प्रयासाः सफलाः जायमानाः सन्ति । विज्ञानविकास-अकादम्या सफलनूतनखाद्यसुरक्षाकार्यक्रमस्य रूपेण स्वीकृतिः प्राप्ता अस्ति।

सारांशः

कस्यचित् देशस्य खाद्यसुरक्षा तदा सुनिश्चिता भवति यदा तस्य सर्वेभ्यः नागरिकेभ्यः पोषकं भोजनम् उपलब्धं भवति। सर्वेषां जनानां पार्श्वे स्वीकार्यगुणवत्तायुक्त-खाद्यानां क्रयणस्य सामर्थ्यं भवति एवञ्च भोजनप्राप्तौ कोऽपि अवरोधः न भवति। निर्धनतारेखातः अधोवर्तिनः जनाः खाद्यदृष्ट्या सदैव असुरक्षिताः भवितुं शक्नुवन्ति अपरतः सम्पन्नजनाः अपि आपदां समये खाद्यदृष्ट्या असुरक्षिताः भवितुं शक्नुवन्ति। यद्यपि भारते जनानां कश्चन विशालवर्गः खाद्यानां पोषकतत्त्वानां च असुरक्षया ग्रस्तः अस्ति। सर्वाधिकप्रभावितेषु समूहेषु ग्रामीणक्षेत्राणां भूमिहीनाः जनाः एवञ्च निर्धनकुटुम्बाः, स्वल्पवेतनकार्येषु संरताः जनाः अथ च नगरीयक्षेत्रेषु ऋतुकालिककार्येषु रताः अनियतश्रमिकाः सम्मिलिताः सन्ति। देशस्य केषुचित् क्षेत्रेषु खाद्यदृष्ट्या असुरक्षितजनानां विशालसङ्ख्या तुलनात्मकरूपेण अधिका अस्ति यथा आर्थिकरूपेण पश्चवर्तिषु राज्येषु यत्र बहुनिर्धनता अस्ति, जनजातीयक्षेत्रेषु दूरस्थक्षेत्रेषु च अपि च एतादृशक्षेत्रेषु यत्र प्राकृतिकापदाः जायमानाः भवन्ति। समाजस्य सर्वेषां वर्गाणां कृते खाद्यस्य उपलब्धता सुनिश्चिता भवेत् इति एतदर्थं भारतशासनेन सावधानं खाद्यसुरक्षाप्रणाली सज्जीकृता अस्ति । अस्याः खाद्यसुरक्षाप्रणाल्याः घटकद्वयम् अस्ति - (क) बफ़र स्टॉक इति (ख) सार्वजनिकवितरणप्रणाली इति। सार्वजनिकवितरणप्रणालीम् अतिरिच्य अनेके निर्धनतोन्मूलन-कार्यक्रमाः अपि समारब्धाः सन्ति येषु खाद्यसुरक्षायाः घटकम् अपि सम्मिलितम् आसीत्। एतेषु केचन कार्यक्रमाः एवं सन्ति - एकीकृतबालविकाससेवाः, कार्यस्य स्थाने अन्नम्, मध्याह्नभोजनम् एवञ्च अन्त्योदयान्नयोजना इत्यादयः । खाद्यसुरक्षोपलब्धतायाः प्रसङ्गे शासनस्य भूमिकाम् अतिरिच्य अनेकाभिः सर्वकारिसमितिभिः एवञ्च शासनेतरसङ्घटनैः अपि अस्यां दिशि त्वरया कार्याणि क्रियमाणानि सन्ति।

अभ्यासः

1. भारते खाद्यसुरक्षा कथं सुनिश्चीयते ?
2. खाद्यस्य असुरक्षया के जनाः सर्वाधिकं ग्रस्ताः भवितुं शक्नुवन्ति ?
3. भारते कानि राज्यानि खाद्यस्य असुरक्षया सर्वाधिकं ग्रस्तानि सन्ति ?
4. किं भवन्तः मन्यन्ते यत् हरितक्रान्त्या भारतं खाद्यान्नसन्दर्भे आत्माश्रितं सञ्जातम् अस्ति ? कथम् ?
5. भारते जनानां कश्चन वर्गः अधुना अपि खाद्येन वञ्चितः अस्ति। व्याख्यां कुर्वन्तु।
6. यदा काचित् आपद् आगच्छति तदा खाद्यपूर्तौ कः प्रभावः भवति ?
7. ऋतुकालिकक्षुद्-मृत्योः दीर्घकालिकक्षुद्-मृत्योः मध्ये कः भेदः अस्ति ?
8. निर्धनानां कृते खाद्यसुरक्षां प्रदातुं शासनेन किं कृतम् अस्ति ? शासनपक्षतः आरब्धयोः कयोश्चित् द्वयोः योजनयोः चर्चां कुर्वन्तु।
9. शासनं बफ़र-स्टॉक् इत्यस्य निर्माणं किमर्थं करोति ?
10. टिप्पणं लिखन्तु --
    (क) न्यूनतमसमर्थितं मूल्यम्
    (ख) बफ़र स्टॉक इति
    (ग) निर्गममूल्यम्
    (घ) उचितमूल्यानाम् आपणः
11. खाद्यान्नापणानां संचालने काः समस्याः सन्ति ?
12. खाद्यानि सम्बद्धानि वस्तूनि च सुलभायितुं सहकारिसमितीनां भूमिकाम् अवलम्ब्य एकां टिप्पणीं लिखन्तु।

संदर्भः

देवः, एस.महेन्द्रः,अधिनियमः,के.पी. अपि च रामचन्द्रनः, नीरा (सं.),2003, 'टुआर्डस ए फूड सिक्योर इण्डिया: इश्यूज एंड पॉलिसीज, इंस्टीच्यूट फॉर ह्यूमन-डेवलपेमेंट, नवदेहली।

एफ.ए.ओ.1996,वर्ल्ड फूड सम्मिट 1995, खाद्य-कृषि-सङ्घटनम्, रोमः।

आर्थिक-सर्वेक्षणम् 2002-03,2003-04,2004-05, वित्तमन्त्रालयः, भारतसर्वकारः, नवदेहली।

आई.आई.पी.एस.2000,राष्ट्रियस्वास्थ्यपरिवारसर्वेक्षणम् – 2, इंटरनेशनल-इंस्टीच्यूट ऑफ पॉपुलेशन साइंसेज, मुम्बयी।

सागर, विद्या, 2004, भारतीयखाद्यसुरक्षा,पेपर-प्रेजेंटेड इन ए.डी.आर.एफ.-आई.एफ.आर.आई.फाइनल मीटिंग ऑन फूड सिक्युरिटी इन इण्डिया, सितम्बरमासः 10-11,नवदेहली।

सक्सेना, एन.सी.,2004,सेनेरजाइजिंग-गवर्नमेंट-एफर्ट फॉर फूड सिक्युरिटी, स्वामीनाथन, एम.एस.मेडरानो,पैड्रो, (सं.) इत्यस्मिन्, टुवार्डस हंगर फ्री इण्डिया, ईस्ट-वेस्ट-बुक्स, चैन्नै।

सक्सेना, एन.सी.,2004,रिऑर्गनाइजिंग-पॉलिसीज-एण्ड डेलेवरी फॉर एलीवियेटिंग हंगर एंड मालन्यूट्रिशन, नेशनल फूड सिक्युरिटी सम्मिट, नवदेहल्यां प्रस्तुतपत्रम्।

सेन,ए.के.,1983,पॉवर्टी एंड फैमिंस : एन ऐसे ऑन इनटाईटलमेंट एंड डेप्रिवेशन, ऑक्सफोर्ड यूनिवर्सिटी प्रेस।

शर्मा, रेखा मीनाक्षी, जे.वी.,2004,माइक्रोन्यूट्रियेंट-डिफिसिएन्सीज इन रूरल डाइट्स, टुवार्डस हंगर फ्री इण्डिया: फ्रॉम विजन टू एक्शन, प्रोसीडिंग्स ऑफ कंसलटेशन ऑन "टुवार्डस हंगर फ्री इण्डिया": काउंट डाउन फ्रॉम 2007, नवदेहली।

यू.एन.1975,रिपोर्ट ऑफ द वर्ल्ड फूड कॉन्फ्रेंस 1975 (रोमः),यूनाइटेड नेशंस, न्यूयार्कः।

सैनी श्वेता एण्ड मार्या कोज़िका (2014) इवोल्यूशन एण्ड क्रिटीक ऑफ बफर स्टॉकिंग पोलसी ऑफ इण्डिया वर्किंग पेपर न 283, इण्डियन कौंसिल फार रिसर्च ऑन इन्टरनेशनल इकोनोमिक रिलेशन्स।

0971

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-523-7